न्नजंति बुद्धिसंपन्नास्तरंत्येव भवार्णवं॥ कामक्रोधादयस्तत्र बहवः परिपंथिनः॥ भीषयंति सदा चेतो मातरि
गोष्पदायते॥ अतस्तेऽसगुणं रूपं ध्यात्वाहं सर्वदा हृदि॥ मुक्तश्चरामि लोकेषु पूज्योऽहं सर्वदैवतैः॥ राम त्वया
महत्कार्यं कृतं देवहितैषिणा॥ कुंभकर्णवधेनाद्य भूभारोऽयं गतः प्रभो॥ श्वो हनिष्यति सौमित्रिरिं
द्रजेतारमाहवे॥ हनिष्यसे परात्वं परश्वो दशकंधरं॥ पश्यामि सर्वदेवैश्च सिद्धैः सह नभोगतः॥ अनु
गृहीष्व मां देव गमिष्यामि सुरालयं॥ इत्युक्त्वा राममामंत्र्य नारदो भगवानृषिः॥ ययौ देवपूज्यमानो
ब्रह्मलोकमकल्मषं॥ भ्रातरं निहतं श्रुत्वा कुंभकर्णं महाबलं॥ रावणः शोकसंतप्तो रामेणाक्लिष्ट
कर्मणा॥ मूर्छितः पतितो भूमावुत्थाय विललाप ह॥ पितृव्यं निहतं श्रुत्वा [redacted] पितरं चातिवि
ह्वलं॥ इंद्रजित्प्राह शोकार्तं शोकं त्यज महामते॥ मयि जीवति राजेंद्र मेघनादे महाबले॥ दुःखस्याव
सरः कुतो देवांतक महामते॥ विसृज्य दुःखमखिलं स्वस्थो भव महामते॥ सर्वं समं करिष्यामि
हनिष्यामि च ते रिपून्॥ गत्वा निकुंभिलां सद्यः संतर्पयित्वा हुताशनं॥ लब्ध्वा रथादिकं तस्मादजेयोऽहं भवा
म्परैः॥ इत्युक्त्वा त्वरितं गत्वा निर्दिष्टं हवनस्थले॥ रक्तमाल्यांबरधरो रक्तगंधानुलेपनः॥ निकुंभिला
स्थिते मौनी हवनायोपचक्रमे॥ विभीषणोऽपि तच्छ्रुत्वा मेघनादस्य चेष्टितं॥ प्राह रामाय सकलं होमारं

मूरव
स्वेन्नामर
नित्यं [illegible]
मानसे॥
पूजानि
केषामः
नौ[illegible]
गिरांराम

न्दुरात्मनः ॥ समाप्यते चेद्धोमोयं मेघनादस्य दुर्मतेः ॥ तदाजेयो भवेद्राम मेघनादः सुरासुरैः ॥ अतः
शीघ्रं लक्ष्मणेन घातयिष्यामि रावणिं ॥ आज्ञापय मया सार्द्धं लक्ष्मणं बलिनां वरं ॥ हनिष्यति न सं
देहो मेघनादं तवानुजः ॥ श्रीराम उवाच ॥ अहमेव गमिष्यामि हंतुमिंद्रजितं रिपुं ॥ आग्नेयेन मह
स्त्रेण सर्वराक्षसघातिना ॥ विभीषणोपि तं प्राह नासावन्यैर्निहन्यते ॥ यस्तु द्वादश वर्षाणि निद्राहा
रविवर्जितः ॥ तेनैव मृत्युर्निर्दिष्टो ब्रह्मणास्य दुरात्मनः ॥ लक्ष्मणस्त्वयोध्याया निर्गम्य
त्वया सह ॥ तदादि निद्राहारादीन्न जानाति रघूत्तम ॥ सेवार्थं तव राजेंद्र ज्ञातं सर्वमिदं मया
॥ हनिष्यति न संदेहः शेषः साक्षाद्धराधरः ॥ त्वमेव साक्षाज्जगतामधीशो नारायणो लक्ष्मण एव
शेषः ॥ युवां धराभारनिवारणार्थं जातौ जगन्नाटकसूत्रधारौ ॥ इति श्रीमदध्यात्मरामायणे उमा० १०
युद्धकांडे दशमः सर्गः ॥ विभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत् ॥ जानामि तस्य रौद्रस्य मा
यां कृत्स्नां विभीषण ॥ स हि ब्रह्मास्त्रविच्छूरो मायावी च महाबलः ॥ जानामि लक्ष्मणस्यापि स्वरूपं मम
सेवनं ॥ ज्ञात्वैवासमहं तूष्णीं भविष्यत्कार्यगौरवात् ॥ इत्युक्त्वा लक्ष्मणं प्राह रामो ज्ञानवतां वरः ॥ ग
च्छ लक्ष्मण सैन्येन महता जहि रावणिं ॥ हनुमत्प्रमुखैः सर्वैर्यूथपैः सह लक्ष्मण ॥ जांबवानृक्षपति
ना सह सैन्येन संवृतः ॥ विभीषणश्च सचिवैः सह त्वामभियास्यति ॥ अभिज्ञस्तस्य देशस्य

रोपुरा॥ तदप्याहं मया पूर्णीकृतं कुशलं बूहि राघवं॥ लक्ष्मणं बूहि मे किंचित् दुरुक्तं भाषितं पुरा॥ तत् क्षमस्व त्वया
वेन भाषितं कुलनंदन॥ तारयेन्मां यथा रामस्तथा [illegible] कुरु कृपान्वितः॥ इत्युक्त्वा रुदती सीता दुःखेन म
हतावृता रुदती॥ मयाप्याश्वासिता राम वदता सर्वमेव ते॥ ततः प्रस्थापितो राम त्वत्सकाशमिहागतः॥
तदागमनवेलायामशोकवनिकां प्रियं॥ उत्पाट्य राक्षसांस्तत्र बहून् हत्वाक्षमग्रदं॥ रावणस्य सुतं हत्वा रा
वणं च निरीक्ष्य च॥ लंकामशेषतो दग्ध्वा पुनरप्यागमं क्षणात्॥ श्रुत्वा हनूमतो वाक्यं रामोऽत्यंतप्रहृष्टधीः॥
हनूमते कृतं कार्यं देवैरपि सुदुष्करं॥ उपकारं न पश्यामि तव प्रत्युपकारिणः॥ इदानीं ते प्रयच्छामि सर्वस्वं मम
मारुते॥ इत्यालिंग्य समाकृष्य गाढं वानरपुंगवं॥ सार्द्रनेत्रो रघुश्रेष्ठः परां प्रीतिमवाप सः॥ हनूमंतमुवाचेदं
राघवो भक्तवत्सलः॥ परिरंभो हि मे लोके दुर्लभः परमात्मनः॥ अतस्त्वं मम भक्तोऽसि प्रियोऽसि हरिपुंगवः॥
२ यत्पादपद्मयुगलं तुलसीदलाद्यैः संपूज्य विष्णुपदवीमतुलां प्रयांति॥ तेनैव किं पुनरसौ परिरब्धमूर्ती रा ८२
मेण वायुतनयः कृतपुण्यपुंजः॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुंदरकांडे पंचमः सर्गः
॥ सुंदरकांडे सर्गाः पंचैवाध्यात्मशास्त्रे स्थितिप्रोक्ताः श्रीशिवज्ञातानि श्लोकास्त्रिभुवनपातकहरा सुंदरकांडे समा
प्तं॥ सूत उवाच॥ [illegible] भाषितं वाक्यं श्रुत्वा रामो हनूमतः॥ उवाचानंतरं वाक्यं हर्षेण महता वृतः॥

कैर्या
पं॥ तन्मारम्भतवात्पर्यंदं ङ्कागमनं तथा॥ दशाननेन हरणं ज्ञान[कैर्या]रहितेत्वयि॥ सुग्रीवेणयथामैत्रीकृत्वावा
लिनिवर्हणं॥ मार्गणार्थं च वैदेह्याः सुग्रीवेण विसर्जिताः॥ महाबलामहासत्वाहरयोजितकाशिनः॥ गताः सर्वे त्र
सर्वे वैतत्रैकोहमिहागतः॥ अहं सुग्रीवसचिवोदासोहं राघवस्य हि॥ दृष्ट्वायज्ञानकीभाग्यात्प्रयासः फलितोद्य
मे॥ इत्युदीरितमाकर्ण्य सीताविस्फारितेक्षणा॥ केन वा कर्णपीयूषं श्रावितं मे शुभाक्षरं॥ यदि सत्यं तदायातु मद्दृष्टी
नपथं तु सः॥ ततो हं वानराकारः सुसूक्ष्मरूपेण जानकीं॥ प्रणम्य प्रांजलिर्नूनं दूरादेव स्थितः पुनः॥ पृष्टो हं सीतया
कस्त्वमित्यादि विस्तरं॥ मया सर्वं क्रमेणैव विज्ञापितमरिंदम॥ पश्चान्मयार्पितं देव्यै नवदत्तांगुलीयकं॥ तेन मा
मतिविश्वस्ता वचनं चेदमब्रवीत्॥ यथा दृष्टास्मि हनुमत् अर्द्धमानादिवानिशं॥ राक्षसीनां तर्जनैः स्वं सर्वं कथय
राघवे॥ मया तेंऽदेव रामोपि त्वच्चिंतापरिनिष्टितः॥ परिशोच्यत्प्रहोरात्रं त्वद्धान्तं नाधिगम्यसः॥ इदानीमेव गत्वाहं
स्थितिं रामाय ते ब्रुवे॥ राक्षसैः संतर्जिता साध्वी रावणेन दुरात्मना॥ तत्रावधि कृतस्तेन स्वांतःपुरनिवासिना॥ मासद्वये
न चेत्सीता नायाति मम मंदिरं॥ भक्षयिष्यामि तां सीतामिति मे निश्चिता मतिः॥ रामः सत्वरणमार्गेण सुग्रीवेण सुलक्ष्म
णः॥ वानरानीकयैः सार्द्धं श्वागमिष्यति तेंतिकं॥ रावणं स[illegible]सकुलं हत्वा नेष्यति त्वां स्वकं पुरं॥ अचिरेणं दृष्टिमे
देवि यथा मां विश्वसेद्धि सः॥ इत्युक्ता सौ शिरोरत्नं तु उपायो[illegible]स्थितं प्रियं॥ दत्वा काये न यत्कृतं चित्रकूटति

स्नास्त्रेण समंततः॥नानाविधानिशस्त्राणि वानरानीकमर्दयन्॥ववर्ष शरजालानि तद्भुतमिवाम्बुदः॥रामो
पि मानयन् ब्रह्मनमस्त्रमस्त्रविदांवरः॥क्षणं तूष्णीमुवासाथ रुद्धं पतितं बलं॥वानराणां रघुश्रेष्ठश्चुकोपान
लसन्निभः॥चापमानय सौमित्रे ब्रह्मास्त्रेणासुरं रणे॥भस्मीकरोमि मे रूपबलमध्वरधूतम॥मेघनादोपि
तच्छ्रुत्वा रामवाक्यमतंद्रितः॥तूर्णमेजगाम नगरं मायया मायिकोऽसुरः॥पतितं वानरानीकं दृष्ट्वा रामोतिदुःखितः॥
उवाच मारुतिं शीघ्रं गत्वा क्षीरं महोदधिं॥तत्र द्रोणगिरिर्नाम दिव्यौषधिसमन्वितः॥तमानयाद्य त्वं गत्वा सं
जीवय महामते॥वानरौघान्महासत्व कीर्तिस्ते सुस्थिरा भवेत्॥आज्ञाप्रमाणमित्युक्त्वा जगामानिलनंद
130 नः॥आनीय च गिरिं सर्वान् वानरान् वानरर्षभः॥जीवयित्वा पुनस्तत्र स्थापयित्वा ययौ द्रुतं॥पूर्ववद्भैरवं नादं
१३० वानराणां बलौघतः॥श्रुत्वा विस्मयमापन्नो रावणो वाक्यमब्रवीत्॥राघवो मे महाशत्रुः प्राप्तो दैवविनिर्मितः १०२
हंतुं तं समरे शीघ्रं गच्छंतु मम यूथपाः॥मंत्रिणो बांधवाः शूराः ये च मत्प्रियकांक्षिणः॥सर्वे गच्छंतु युद्धाय
त्वरितं मम शासनात्॥ये न गच्छंति युद्धाय भीरवः प्राणविप्लवात्॥तान्हनिष्याम्यहं सर्वान्मम शासनपराङ्मु
खान्॥ततः श्रुत्वा भयसंत्रस्ता निर्जग्मू रणकोविदाः॥अतिकायः प्रहस्तश्च महानादमहोदरौ॥देवश
त्रुर्निकुंभश्च देवांतकनरांतकौ॥अपरे बलिनः सर्वे ययुर्युद्धाय वानरैः॥एते चान्ये च बहवः शूराः शत

वप्रियाकामार्यैलंकामारुरुत्सदा॥ तैर्द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवंगमाः॥ सहस्रशश्च यूथानां कोटियूथा
नां कोटियूथाश्च यूथपाः॥ कोटीशतयुताश्चान्ये रुरुधुर्नगरं भृशं॥ आप्लवंतः प्लवंतश्च गर्जंतश्च प्लवंगमाः॥ रामो जय
त्यतिबलो लक्ष्मणश्च महाबलः॥ राजा जयति सुग्रीवो राघवेणाभिपालितः॥ इत्येवं घोषयंतश्च समं युयुधिरे रिरिति:॥
हनुमानंगदश्चैव कुमुदो नील एव च॥ नलश्च शरभश्चैव मैंदो द्विविद एव च॥ जांबवान्दधिवक्त्रश्च केशरी तार एव
च॥ अन्ये तु बलिनः सर्वे यूथपाश्च प्लवंगमाः॥ द्वाराण्याप्लुत्य लंकायाः सर्वतो रुरुधुर्भृशं॥ तदा वृक्षैर्महाकायाः पर्वता
ग्रैश्च वानराः॥ निजघ्नुस्तानि रक्षांसि नखैर्दंतैश्च वेगिताः॥ राक्षसाश्च तदा भीमा द्वारेभ्यः सर्वतो रुषाः॥ निर्गत्य भिंडिपा
लैश्च खड्गैः शूलैः परश्वधैः॥ निजघ्नुर्वानरानीकं महाकायं महाबलाः॥ राक्षसांश्च तथा जघ्नुर्वानरा राजितकाशि
नः॥ तथा बभूव समरो मांसशोणितकर्दमः॥ रक्षसां वानराणां च संबभूवोद्भुतो रणः॥ ते हयैश्च गजैश्चैव रथैः कांचनस
न्निभैः॥ रक्षोव्याघ्रा युयुधिरे नादयंतो दिशो दिश॥ राक्षसाश्च कपींद्राश्च परस्परजयैषिणः॥ राक्षसान्वानरा जघ्नुर्वानरां
श्चैव राक्षसाः॥ रामेण विष्णुना दृष्टा हरयो दिविजांगजाः॥ बभूवुर्बलिनो हृष्टास्तदा पीतामृता इव॥ सीतानिमर्श
पापेन रावणेनाभिपालितान्॥ हतश्रीकान्हतबलान्राक्षसान्जघ्नुरोजसा॥ चतुर्णांश्चावशेषेण निहतं रक्षसां ब
लं॥ स्वसैन्यं निहतं दृष्ट्वा मेघनादोऽतिदुष्टधीः॥ ब्रह्मदत्तवरः श्रीमानंतर्द्धानं गतोऽसुरः॥ सर्वास्त्रकुशलो व्योम्नि ब्र

१०५

अ॰रा॰ तिचापश्यंतुवानराःसर्व्वेमैथिलींमातरंयथा॥ पादचारेणसायातुजानकीममसन्निधिं॥ श्रुत्वातद्रामवचनंशिबिका
दवतुह्यसा। पादचारेणशनकैरागतारामसंनिधिं। रामोथदृष्ट्वातांमायांसीतांकार्यार्थनिर्मितां। अवाच्यवचादारु
णाःप्राहतांरघुनंदनः। अमृष्यमाणासासीतावचनंराघवोदितं। लक्ष्मणंप्राहमेशीघ्रंप्रज्वालयहुताशनं। विश्वासा
र्थंहिरामस्यलोकानांप्रत्ययायच। राघवस्यमतंज्ञात्वालक्ष्मणोपितदैवहि। महाकाष्ठचयंचक्रेज्वालयित्वाहुताश
नं। रामपार्श्वमुपागम्यतस्थौतूष्णीमरिंदमः। ततःसीतापरिक्रम्यराघवंभक्तिसंयुता। पश्यतांसर्वलोकानांदेवराक्ष
सयोषितां। प्रणम्यदेवतेभ्यश्चब्राह्मणेभ्यश्चमैथिली। बद्धांजलिपुटाचेदमुवाचाग्निसमीपतः। यथामेहृदयंनित्यंना
पसर्पतिराघवात्। तथालोकस्यसाक्षीमांसर्वतःपातुपावकः। एवमुक्त्वातदासीतापरिक्रम्यहुताशनं। विवेशज्व
१२० लनंदीप्तंनिर्भयेनहृदासती। दृष्ट्वाततोभूतगणाःससिद्धाःसीतांमहावह्निगतांभृशार्ताः। परस्परंप्राहुरहोससी १२०
तेरामःश्रियंत्वांकथमत्यजद्व॥ ॥इतिश्रीमदध्यात्मरामायणेयुद्धकांडेद्वादशोध्यायः॥ ॥ ततःशक्रःसहस्राक्षो
यमश्चवरुणस्तथा। कुबेरश्चमहातेजाःपिनाकीवृषभवाहनः। ब्रह्माब्रह्मविदांश्रेष्ठोमुनिभिःसिद्धचारणैः। पित

हत्वाविभीषणं।श्रुत्वातुतुष्टाप्रियंवाक्यंहर्षगद्गदयागिरा।किंतेप्रियंकरोम्यद्यनपश्यामिजगत्त्रये।समंतेप्रियवाक्य
स्यरत्नाच्चाभरणानिच।एवमुक्तस्तुवैदेह्याप्रत्युवाचप्लवंगमः॥रत्नौघाद्विविधाद्वापिदेवराज्याद्विशिष्यते।हतशत्रुंवि
जयिनंरामंपश्यामिसुस्थिरं।तस्यतद्वचनंश्रुत्वामैथिलीप्राहमारुतिं।सर्वेसौम्यागुणाःसौम्यत्वय्येवपरिनिष्ठिताः॥
रामंद्रष्टुमिच्छामिशीघ्रंमाज्ञापयत्वंतुराघवं॥तथेतितांनमस्कृत्यययौद्रष्टुंरघूत्तमं।जानकीभाषितंसर्वंरामस्याग्रेन्य
वेदयत्।यन्निमित्तोयमारम्भःकर्मणांचफलोदयः॥तांदेवींशोकसंतप्तांद्रष्टुमर्हसिमैथिलीं।एवमुक्तोहनुमतारा
मोज्ञानवतांवरः॥मायासीतांपरित्यज्यजानकीमनलोत्थितां।आदौतुमनसाध्यात्वारामःप्राहविभीषणं।गच्छरा
जन्जनकजामानयशुभमांतिकं।स्नातांविरजवस्त्राढ्यांसर्वाभरणभूषितां।विभीषणोपितच्छ्रुत्वाजगामसहमा
रुतिः।राक्षसीभिःसुवृद्धाभिःस्नापयित्वाथमैथिलीं।सर्वाभरणसंपन्नामारोप्यशिबिकोत्तमे।याष्टिकैर्बहुभिर्गु
प्तांकंचुकोष्णीषिभिःशुभां।तांद्रष्टुमागतांसर्वेवानराञ्जनकात्मजां।तान्वारयंतोबहवःसर्वतोवेत्रपाणयः।को
लाहलंप्रकुर्वंतोरामपार्श्वमुपाययुः॥दृष्ट्वातां।शिबिकारूढांदूराद्रघूत्तमः॥विभीषणकिमर्थंतेवानरान्वारयं

नानात्वं तदा[illegible] तेन संसृतिः ॥ जीवतोपि यथा तद्वद्विमुक्तस्यापि नहं हृते ॥ तस्मान्मायामनोमात्रं जगद्ब्रह्मम
तात्वमं ॥ राम त्वं द्रुतगवति मनो देह्यात्मनीश्वरे ॥ सर्वभूतात्मनि परे [illegible] मात्मस्वरूपिणि ॥ बाह्येन्द्रियार्थ
संबंधात्त्यज्य चित्तामनः शनैः ॥ तत्र दोषानुदर्शयित्वा रामाय देनियोजय ॥ देहबुद्ध्यान्न वेद्मा तामपित
मातासुहृत्प्रियाः ॥ विलक्षणं यदा देहाज्ज्ञानात्मात्मानमात्मना ॥ तदा कः कस्य वा बंधुः [illegible] तामातापि
ता सुहृत् ॥ मिथ्याज्ञानवशाज्जाता दारागारादयः सदा ॥ शब्दादयश्च विषया विविधाश्चैव संपदः
॥ बलं कोशो भृत्यवर्गो राज्यं भूमिः सुतादयः ॥ अज्ञानजत्वात्सर्वे ते क्षणसंगमसं[illegible] गुराः ॥ अथाति
रहृदा रामं ज्ञावयन् [illegible] विनं ॥ अनवतैस्वराज्यादि भुंजत्वारब्धमत्र हा ॥ भूतेन विषया[illegible] जन
११८ वर्तेमानमथाचरन् ॥ विहरस्व यथान्यायं भवदोषैर्न लिप्यसे ॥ आज्ञापयति राम त्वां यद्गुरुः सांप
118 रायिकं तत्कुरुष्व यथाशास्त्रं संदर्शितो ह्याचार्योपि योषितः ॥ निवारय महाबुद्धे लंकां गच्छतु मा चिरं ॥ श्रुत्वा रघु ११८
थावद्गुरुवचनं स्मित्वा सपदि [illegible] ॥ [illegible] रामप्रार्थितगुणायाततः ॥ विसृज्य बुद्धाः
ज्ञे [illegible] सधर्मार्थसहितं वचः ॥ रामस्यैवानुवृत्त्यर्थमुत्तरं पर्यभाषत ॥ [illegible] धर्मेण
[illegible] ॥ नाहं स्मि देवसंस्कर्तुं परिहारान्विधिं ॥ श्रुत्वा तद्वचनं प्रीतो रामो वचनमब्रवीत् [illegible]

धानाद्दृष्टपदेशोक्तो धाम्नः केभिनवंदृ

परमांगतिं॥एतस्मिन्नंतरेदृष्ट्वारावणंपतितंभुवि॥मंदोदरीमुखाःसर्वाःस्त्रियोरावणपालिताः॥पतितं
रावणंस्पृष्ट्वाशोकविह्वलाःपर्यदेवयन्॥विभीषणस्तुशोकार्त्तःशोकेनमहतावृतः॥पतितोरावणस्या
ग्रेबहुधापर्यदेवयन्॥रामस्तुलक्ष्मणंप्राहदेवाधयस्वविभीषणं॥करोतुभ्रातृसंस्कारंकिंविलंबेनमा
नद॥स्त्रियोमंदोदरीमुख्याःपतितांविलपंतिच॥निवारयंतुताःसर्वाराक्षसीःरावणप्रियाः॥एवमुक्ते
ष्यतिरामेणलक्ष्मणोगाद्विभीषणं॥उवाचमृतकोपंतेपतितंमृतकोपमं॥शोकेनमहताविष्टंसौमित्रिर्बरि
रा दमब्रवीत्॥यंशोचसित्वंदुर्बुद्धेनकोपितववदविभीषण॥त्वंवास्यकतमःस्वप्नोपुरेदानींमतःपरं॥यदुक्तो ये
योद्यपतिताःसिकतायोतितद्भुवा॥संयुज्यंतेवियुज्यंतेतथाकालेनदेहिनः॥यथाधानासुवैधानाभवं
तिनभवंतिच॥एवंभूतेषुभूतानिप्रेरितानीशमायया॥त्वंचैवमेवयमन्येतुतुल्याःकालवशोद्भवाः॥जन्मम
त्यूयदायस्मात्तदातस्माद्भविष्यतः॥ईश्वरःसर्वभूतानिभूतैःसृजतिहंत्यज॥यात्मसृष्टैरस्वतंत्रैरनपेक्षोपिहि
बालवत्॥देहेनेदेहिनोजीवादेसोदेहस्मिन्नियते॥बीजादेवयथाबीजंदेहान्यद्देहशाश्वतः॥देहीदेहविभागो
यमविवेककृतःपुरा॥नानात्वंजन्मनाशश्चक्षयोवृद्धिःक्रियाफलं॥द्रष्टुराचोत्यतद्धर्मोयथाग्नेर्दारुविक्रियाः
॥तदिमेदेहसंयोगात्तत्त्वात्मन्यात्मतोत्यसद्भावात्॥प्रायेयथातथानान्यज्जायतेसत्त्सदात्मनः॥सुप्तःस्वप्नादनं
गौ

अयंतुराक्षसः क्रूरो ब्रह्महातीव्रमानसः ॥ परदारा[illegible]ततो विमुक्तो [illegible]सर्वैः [illegible] सर्वैर्नुते तु राममेव प्र
विष्टवान् ॥ एवं तु वसुदेवे तु नारदः [illegible] रामेण [illegible] विभीषणः ॥ रावणेन [illegible]
निकां[illegible]दमावयन् ॥ त्यैः सहमन्दाराम [illegible] संयुतः ॥ [illegible] त्वा रामे तस्य चनि[illegible] यात्सर्वं च राघवं ॥
[illegible]पन्नं तु दिने स्वप्ने राममेवानुधावति ॥ [illegible] रावणस्य [illegible] गुरुस्य ब्रह्म[illegible] रामेण निहतस्य तेन
[illegible]तो दोष कल्मषः ॥ रामसायुज्य[illegible] रावणं भुक्त[illegible] ॥ [illegible] परदारेषु सत्स्व
पि दिस्या[illegible] स्वयं [illegible] रघुकुल[illegible] परतः ॥ [illegible] तज्जनित
नेक दोषैर्विमुक्तः सद्यो रामस्य विष्णोः सुरवर विनुतं याति वैकुंठमाद्यं ॥ हत्वा युद्धे दशास्यं त्रिभुवनविषमं
वामहस्तेन चापं भूमौ विष्टभ्य तिष्ठन्नितरकरधृतं भ्रामयन्बाणमेकं ॥ आरक्तोपान्तनेत्रः शरदलितवपुः सू
र्यकोटिप्रकाशो वीरश्रीबंधुरांगस्त्रिदशपतिनुतः पातु मां वीररामः ॥ इति श्रीमदध्यात्मरामायणे उमा
युद्धकांडे एकादशः सर्गः ॥ ततो विभीषणं दृष्ट्वा हनूमंतं तत पार्श्वगं ॥ लक्ष्मणं कपिराजं च जांबवंतं तथा
परान् ॥ परितुष्टेन मनसा सर्वानेवाब्रवीद्वचः ॥ भवतां बाहुवीर्येण निहतो रावणो मया ॥ कीर्तिः स्थास्य
ति वः पुण्या यावच्चंद्रदिवाकरौ ॥ कीर्तयिष्यंति भवतां कथां त्रैलोक्यपावनीं ॥ मयोपेतां कलिहरां यास्यंति
११७ (left margin)
११७ (right margin)

मेरुमंदरौ॥ स विश्वपि च विन्यस्ता लोकपाला महौजसः॥ जाज्वल्यमानं वपुषा नांतकास्करवर्चसा॥ तमुग्रमस्त्रं
लोकानां भयनाशनमद्भुतं॥ अभिमंत्र्य ततो रामस्तं महेषुं महाभुजः॥ वेदप्रोक्तेन विधिना संदधे कार्मुके बली॥
तस्मिन्संधीयमाने तु राघवेण शरोत्तमे॥ सर्वभूतानि वित्रेसुश्चचाल च वसुंधरा॥ स रावणाय संक्रुद्धो भृशमानम्य का
र्मुकं॥ चिक्षेप परमायत्तस्तं शरं मर्मघातिनं॥ स वज्रमिव दुर्द्धर्षो वज्रपाणिविसर्जितः॥ कृतांत इव घोरास्यो न्य
पतद्रावणोरसि॥ स निर्भिन्नो महाघोरः शरीरांतकरः शरः॥ चिच्छेद हृदयं तूर्णं रावणस्य महात्मनः॥ रावण
स्य हरन्प्राणान्विवेश धरणीतलं॥ स शरो रावणं हत्वा रामतूणीरमाविशत्॥ तस्य हस्तात्पपाताशु सशरं कार्मुकं
महत्॥ गतासुर्भीमवेगो नराक्षसेंद्रोपतद्भुवि॥ तं दृष्ट्वा पतितं भूमौ हतशेषाश्च राक्षसाः॥ हतनाथा भयत्रस्ता दु
द्रुवुः सर्वतो दिशं॥ दशग्रीवस्य निधनं विजयं राघवस्य च॥ ततो नितेदुः संहृष्टा वानरा जितकाशिनः॥ वदंतो राम
विजयं रावणस्य च तद्वधं॥ अथांतरिक्षे व्यनदत्सौम्यस्त्रिदशदुंदुभिः॥ पपात पुष्पवृष्टिश्च समंताद्राघवोपरि॥
तुष्टुवुर्मुनयः सिद्धाश्चारणाश्च दिवौकसः॥ अथांतरिक्षे ननृतुः सर्वस्याप्सरसो मुदा॥ रावणस्य च देहोत्थं
ज्योतिरादित्यवत्स्फुरत्॥ प्रविवेश रघुश्रेष्ठं देवानां पश्यतां सतां॥ देवा ऊचुः॥ अद्य नो नाम महाभाग्यं रा
वस्य महात्मनः॥ वयं तु सात्विका देवा विष्णोः कारुण्यभाजनाः॥ भयदोषादिभिर्व्याप्ताः संसारे परिवर्तिनः॥

दे॰२

क्रमा॥ तएतेनिःफलायातारावणस्यविघातने॥ इतिचिंताकुलेरामेसमीपस्थोविभीषणः॥ उवाचराघ
वंवाक्यंब्रह्मदत्तवरोह्यसो॥ विछिन्नाबाहवोप्यस्यविछिन्नानिशिरांसिच॥ उत्पत्स्यंतेपुनःशीघ्रंइत्या
हभगवानजः॥ नाभिदेशेमृतंतस्यकुंडलाकारसंस्थितं॥ तछोषयानलास्त्रेणतस्यमृत्युस्ततोभवेत्
॥विभीषणवचःश्रुत्वारामःशीघ्रपराक्रमः॥ पावकास्त्रेणसंयोज्यनाभिंविव्याधरक्षसः॥ अनंतरं
चचिछेदशिरांसिचमहाबलः॥ बाहूनपिचसंरब्धोरावणस्यरघूत्तमः॥ ततोघोरांमहाशक्तिमादाय
दशकंधरः॥ विभीषणवधार्थायचिक्षेपक्रोधविह्वलः॥ चिछेदराघवोबाणैस्तांशितैर्हेमभूषितैः
॥दशग्रीवशिरछेदात्तदातेजोविनिर्गतं॥ म्लानरूपोबभूवाथछिन्नैःशीर्षैर्भयंकरैः॥ एकेनमुख्यशि
रसाबाहुभ्यांरावणोबभौ॥ रावणस्तुपुनःक्रुद्धोनानाशस्त्रास्त्रवृष्टिभिः॥ ववर्षरामंतंरामस्तथाबाणैर्व
वर्षच॥ तयोर्युद्धमभूद्घोरंतुमुलंरोमहर्षणं॥ अथसंस्मारयामासमातलीराघवंतदा॥ विसृजास्त्रंवधा
यास्यब्राह्मंशीघ्रंरघूत्तम॥ विनाशकालःप्रथितोयःसुरैःसोद्यवर्त्तते॥ उत्तमांगंनचैतस्यछेत्तव्यंरा
घवत्वया॥ नैवशीर्ष्णिःप्रभोवध्योवध्यएवहिमर्मणि॥ ततःसंस्मारितोरामस्तेनवाक्येनमातलेः॥ जग्रा
हसशरंदीप्तंनिश्वसंतमिवोरगं॥ यस्यपार्श्वेतुपवनःफलेभास्करपावकौ॥ शरीरमाकाशमयंगौरवे

१६

रित्ता वानरेंद्रा बभूवुः स[illegible]सीषा[illegible]॥ दश[illegible]स्ये विंशति भुजः प्रगृहीत शरासनः॥ दशग्रीरा
वणस्तत्र मेनाकइव [illegible]र्वतः॥ रामस्तत्र भृकुटीव[illegible] क्रोधसंरक्तलोचनः॥ कोपं चकार सहसा निर्द्द
न्निव राक्षसं॥ धनुरादाय देवेंद्रः धनुराकारम[illegible]दुतं॥ गृहीत्वा पाणिना बाणं कालानलसमप्रभं॥ नि
र्दहन्निव चक्षुर्भ्यां ददर्शारिपुमंतिके॥ पराक्रमं दर्शयितुं तेजसा प्रज्वालन्निव॥ प्रचक्रमे कालरूपी स
विलो[illegible] स्य पश्यतः॥ विकृष्य चापं रामस्तु रावणं प्रत्यविध्यत॥ हृषयन्वानरानीकं कालांतक इवाबुने॥
ॐ कुबेर[illegible] [illegible] वदनं दृष्ट्वा शोकेन [illegible]वत॥ तत्र सुः [illegible]र्व[illegible] तानिचचाल च वसुंधरा॥ रामं दृष्ट्वा महारौद्रं
उत्पातं [illegible] सुरासुरणं [illegible] स्ता निसर्वकृतानिरावणं चाविवेशाद्भयं॥ विमानस्थाः सुरगणाः सिद्धगंधर्व
किन्नरा॥ ददृशुस्ते महायुद्धं लोकसंवर्त्तकोपमं॥ ऐंद्र[illegible]स्त्रं समादाय रावणस्य शिरांसि च [illegible] न तमूर्द्धानो
रावणस्याप बहवो रुधिरोक्षिताः॥ गगनात्प्रपतंति स्म तालादिव फलानि हि॥ [illegible]नादिनं नचैव रात्रिर्न
संध्या न दिशोपि वा॥ प्रकाशं तेन तद्रूपं दृश्यते तत्र संगरे॥ ततो रामो बभूवाथ विस्मयाविष्टमानसः॥ श
तानि कोतरं [illegible]न्नं शिरसां चैकवर्चसां॥ नचैव रावणः शांतो [illegible]श्यते [illegible] जीविते क्षये॥ ततः सर्वास्त्रविद्वी
रः कौशल्यानंदवर्द्धनः॥ अस्त्रैश्च बहुभिर्युक्तं चिंतयामास राघवः॥ यैर्यैर्बाणैर्हतो दैत्यो महासत्त्वपरा
क्रमः

तमः॥ रथोयंदेवराजस्यविजयायस्यतवप्रभो॥ प्रेषितोयंमहाराजधनुरैंद्रंचभूषितं॥ अभेद्यंकवचं
खड्गंदिव्यःतूणीयुगंतथा॥ आरुह्येवरथंरामरावणंजहिराक्षसं॥ मयासारथिनोदेवत्वंदेवपति
र्यथा॥ इत्युक्तस्तंपरिक्रम्यनमस्कृत्यरथोत्तमं॥ आरुरोहरथंरामोलोकाल्लक्ष्म्यानियोजयन्॥ ततोऽभव
न्महद्युद्धंद्वैरथंरोमहर्षणं॥ महात्मनोराघवस्यरावणस्यचधीमतः॥ आग्नेयेनचाग्नेयंदैवंदैवेनरा
घवः॥ अस्त्रंराक्षसराजस्यजघानपरमास्त्रवित्॥ ततस्तुससृजेघोरंराक्षसंचास्त्रमंत्रवित्॥ क्रोधेनम
हताविष्टोरामस्योपरिरावणः॥ रावणस्यधनुर्मुक्ताःसर्पान्भूत्वामहाविषाः॥ शराःक्रोचनमुखाःदान
घवंपरितोपतन्॥ तैःशरैःसर्पवदनैर्वमद्भिरनलंमुखैः॥ दिशश्चविदिशश्चैवव्याप्तास्तत्रशरास्तवन्॥
रामःसर्पांस्ततोदृष्ट्वासमंता[illegible]स्परिपूरितान्॥ सोपर्णमस्त्रंतत्घोरंपुनःप्रावर्तयद्रणे॥ राघवस्यमु ११५
११५ क्तास्तेबाणाभूत्वागरुडरूपिणः॥ चिच्छिदुःसर्पबाणांस्तान्समंतात्सर्पशात्रवः॥ अस्त्रेप्रतिहतेयुद्धेरामेणराम
दशकंधरः॥ अभ्यवर्षत्ततोरामंघोराभिःशरवृष्टिभिः॥ ततःपुनःशरानीकैराममक्लिष्टकारिणं॥ अ
र्दयित्वातुघोरेणमातलिंप्रत्यविध्यत॥ पातयित्वारथोपस्थेरथकेतुंचकांचनं॥ ऐंद्रानश्वानभ्यहनद्रा
वणःक्रोधमूर्छितः॥ विषेदुर्देवगंधर्वाश्चारणाःपितरस्तथा॥ आर्तीकारंहरिंदृष्ट्वाव्यथितास्समहर्षयः॥ व

रोऽसिममसंमतः॥हनूमानाहतंधिक्त्वांपापत्वंजीवसिरावण॥त्वंतावन्मुष्टिनावज्ञोममतद्युयरावण॥
पश्चान्मयाहतःप्राणान्मोक्ष्यसेनात्रसंशयः॥तथेतिमुष्टिनावज्ञोरावणेनाभिताडितः॥विघूर्णमानन्तय
मःकिंचित्कश्मलमाययौ॥संज्ञामवाप्यकपिराहरावणंहंतुमुद्यतः॥ततोन्यत्रगतोनीत्पारावणोराक्ष
साधिपः॥हनुमानंगदश्चैवनलोनीलस्तथैवच॥चत्वारःसमवेताग्रेदृष्ट्वाराक्षसपुंगवान्॥अग्निव
र्णंतथासर्परोमाणंखड्गरोमकं॥तथावृश्चिकरोमाणंनिजघ्नुःक्रमशोसुरान्॥चत्वारश्चतुरोहत्वाराक्ष
सान्भीमविक्रमान्॥सिंहनादंपृथक्कृत्वारामपार्श्वमुपाययुः॥ततःक्रुद्धोदशग्रीवःसंदधद्दशन
ष्टंविरत्नयनेक्रूरोराममेवान्वधावत॥दशग्रीवोरथस्थस्तुरामंवज्रोपमैःशरैः॥आजघानमहा
धारैर्धाराभिरिवतोयदः॥रामस्यपुरतःसर्वान्वानरानपिविव्यधे॥ततःपावकसंकाशैःशरैःकांचन इंद्रसारथिं
भूषितैः॥अभ्यवर्षद्रणेरामोदशग्रीवंसमाहितः॥रथस्थंरावणंदृष्ट्वाभूमिस्थंरघुनंदनं॥आहूयमात
लिंशक्रोवचनंचेदमब्रवीत्॥रथेनममभूमिस्थंशीघ्रंयाहिरघूत्तमं॥त्वरितेभूतलंगत्वाकुरुकार्यंमम
नघ॥एवमुक्तोथतंनत्वामातलिर्देवसारथिः॥ततोहयैश्चसंयोज्यहरितैःस्यंदनोत्तमं॥स्वर्गाज्जयार्थंरा
मस्यहुपचक्राममातलिः॥अब्रवीच्चततोरामंपुरतोरथेस्थितः॥प्रांजलिर्देवराज्ञेनप्रेषितोस्मिरघू

सर्भ रगु हाचर स्तृद्धैनि॥ सौमित्रेण घनादो हं मयाजीवन्नमोक्ष्यसे॥ तच्च दृष्ट्वापि तद्वाक्यं सप्राह निष्ठुराक्षरं॥ दैवे
वनात.. स्टर इ:साहोद्वाता पितुर्मम॥ दर स्वजनम स्तरूपरत्त्वन्वमागतः॥ कथं दुष्टस्य पुत्राय पापीयान् सि
दुर्मितः॥ इत्युक्तालक्ष्मण. श्रद्धनुमत्यृ तः स्थितो॥ उद्यदायुधनिस्त्रिंशो रथेमहतिसंस्थितः॥ महाप्रमा प्रुध
न्यघोरविस्फारयन्धनुः॥ अथ विमानको बाण श्रुला न्यास तिवानरः॥ ततः शरं दाशरथिः संधाया मित्र षि
णः॥ स सनेरारात्रिसद्वाययुद्ध तपे दत्तस्य स्वा॥ इंद्रजित्तु तेनयनो लक्ष्मणं समुदैक्षत॥ स कोशानिसमस्यैर्नि
सो नाहतः शरैः॥ प्र हतेनवन्पेदः पुनः प्रमाहतेंद्रियः॥ रदर्शावस्थितवीरं वीरो दशरथात्मजं॥ सोभि चक्राम सौ
१११ मित्रिं क्रो धात्सरतलो ॥ ॥ रान् पुविसच्चाय ल णं चेदमब्रवीत्॥ यदि ते प्रथमे युद्धे न दृष्टो मे पराक्रमः॥ अद्य
त्वां रर्दि दि दा भितिरदा॥ एवं तः॥ इत्युक्ता सप्तभिर्बाणैरभिविव्याध लक्ष्मणं॥ दशभिस्तु हनूमंतं तीक्ष्णधारैः १०
शरोत्तमः॥ ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान्॥ क्रोधाद्द्विगुणसंरब्धो निर्बिभेद विभीषणं॥ लक्ष्मणोपि तथा शत्रुं शर
वर्षैरवाकिरत्॥ तस्य नाराचैः सूर्य द्र वचं कांचनप्रभं॥ व्य रथोपस्थे तिलशः पतितं भुवि॥ ततः शरसहस्त्रे
णसंवृ र न सदस विनदत्समरे वीरं लक्ष्मणं भीमविक्रमं॥ वक्षसीन्द्रीयं पतितं दिव्यं कवचं लक्ष्मणस्य च॥ कृत
प्रतिकृतान्य वतरमे ख्याश्वसंतौ तौ युध्येतां तुमुलं युधि॥ शरसंकृत सर्वांगौ सर्वतो रुधिरोक्षितौ
॥सुरार्दकालं तौ ततः शरैः॥ अयुध्येतां महात्मानौ जय विजितौ॥ एतस्मिन्नंतरे वीरो लक्ष्मणः प
चभिः शरैः॥ रा सारथिं र प्यं च स न सन॥ चि छेद कार्मुकं तस्य दर्शयन् हस्तलाघवं॥ सोन्यं तु कार्मु

धजु१

…तिदिदशालिसः ॥ रामस्य वचनं श्रुत्वा लक्ष्मणः सविभीषणः ॥ जग्राह कार्मुकश्रेष्ठमन्यद्भीमपराक्र-
मः ॥ रामपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत् ॥ अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिं ॥ गमिष्यं-
ति क्षिप्रा नालं स्नातुं भोगवतीजले ॥ एवमुक्त्वा स सौमित्रिः परिक्रम्य प्रणम्य तं ॥ इंद्रजिन्निधनाकांक्षी य-
यौ त्वरितविक्रमः ॥ वानरैर्बहुसाहस्रैर्हनुमान्पृष्ठतोन्वगात् ॥ विभीषणश्च सहितो मंत्रिभिस्त्वरितं ययौ ॥ ततो
बली वन्यमुखवारुह्य सौमित्रिस्त्वरियान्वितः ॥ गत्वा निकुंभिलादेशं लक्ष्मणो वानरैः सह ॥ अपश्यद्बलसं-
घातं दूराद्राक्षससंकुलं ॥ धनुरुद्यम्य सौमित्रिः यत्नोन्द्दूरिविक्रमः ॥ अंगदेन च वीरेण जांबवान् ॥ रा-
क्षसाधिपैः ॥ तदा विभीषणः प्राह सौमित्रिं परपरा हसान् ॥ यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते
॥ अप्यनीकस्य महतो भेदने यत्नवान्भव ॥ राक्षसेंद्रसुतोप्यस्मिन्भिन्ने दृश्यो भविष्यति ॥ अभिद्रवाशु
यावद्वै नैतत्कर्म समाप्यते ॥ जहि वीरं दुरात्मानं हिंसापरमधार्मिकं ॥ विभीषणवचः श्रुत्वा लक्ष्मणः
शुभलक्षणः ॥ ववर्ष शरवर्षाणि राक्षसेंद्रसुतं प्रति ॥ पाषाणैः पर्वताग्रैश्च वृक्षैश्च हरियूथपाः ॥ निज-
घ्नुर्वै सर्वतो दैत्यान्तेपि वानरयूथपान् ॥ परस्वधैः शितैर्घोरैरसिभिर्यष्टितोमरैः ॥ निजघ्नुर्वानरानीकं
तदा शब्दो महानभूत् ॥ स संप्रहारस्तुमुलो संययुर्हरिराक्षसान् ॥ इंद्रजित्स्वबलं सर्वं श्रुत्वा धीमांस्तं विस्त-
रं ॥ श्रोमहानभूत् ॥ …
कासः ॥ निकुंभिलां चैत्यकान्तारे शीघ्रं विनिर्गतः ॥ रथमारुह्य सधनुः क्रोधेन महता गमन् ॥ समाहूय…

देवांक ६जुर लाठीर

२

दुंदुरे कुसुमासारैर्वर्षितश्चाभिनंदिताः॥ आजगाम तद्धौमं द्रष्टुं देवमुख्यराः॥ नारदो गगनात्तूर्णं स्वकांस
नासयन्दिशः॥ राममिंदीवरश्यामं उदारांगं धनुर्धरं॥ दृषताम्रविशालाक्षं ऐंद्रास्त्रांचितबाहुकं॥ दयार्द्र
दृष्ट्यापश्यंतं वानरान् शरपीडितान्॥ दृष्ट्वा गद्गदया वाचा भक्त्या स्तोतुं प्रचक्रमे॥ नारदोवाच॥ देवदेव
जगन्नाथ परमात्मन्सनातन॥ नारायणाखिलाधार विश्वसाक्षिन्नमोस्तु ते॥ विशुद्धोज्ञानरूपोसि त्वं
लोकानि वसन्वयन्॥ मायया मनुजाकारो सुखदुःखादिमानिव॥ त्वं माययागुह्यमानः सर्वेषां हृदि सं
१०९ स्थितः॥ स्वयंज्योतिः स्वभावस्त्वं व्यक्त एवमदात्मनां॥ उन्मीलयन्सृजस्येतत्त्रैरामजगत्त्रयं॥ उप
संहृयते सर्वं त्वया चक्षुर्निमीलनात्॥ यस्मिन्सर्वमिदं भाति यत्स्वैतन्न स्थिराचरं॥ यस्मान्न किंचिल्लोके
स्मिंस्तस्मै ते ब्रह्मणे नमः॥ प्रकृतिं पुरुषं कालं व्यक्ताव्यक्तस्वरूपिणं॥ यं जानंति मुनिश्रेष्टास्तस्मै रामायते न
१०८ मः॥ विकाररहितं शुद्धं ज्ञानरूपं श्रुतिर्जगौ॥ त्वां सर्वजगदाकारं मूर्तिं चाप्याहु साकृतिः॥ विरोधो दृश्यते
दैवैदिको वेदवादिनां॥ निश्चयं नाधिगच्छंति त्वत्प्रसादं विनाजनाः॥ मायया क्रीडतो देवन विरोधो मनाग
पि रश्मिजालं रवेर्यद्वदृश्यते जलवद्भ्रमात्॥ भ्रांतिज्ञानात्तथा राम त्वयि सर्वं प्रकल्पते॥ मनसो विषय
देवरूपं निर्गुणं परं॥ रूपं दृश्यं जवे देवदृश्यभावोजने त्वपं॥ अतस्तवावतारेषु रूपाणि निपुणा भुवि॥

नःउत्पुतान्समुखेभ्योनुस्वरणोवह्निवंद्यसः॥राममपार्श्वमुपागत्यचिंतापरउपस्थितः॥कुंभकर्णोपिहृ
स्तान्यायादास्यांप्रेषयन्हरीन्॥चचारवानरींसेनांकलयन्गंधहस्तवत्॥दृष्ट्वातंराघवःक्रुद्धोवाय
व्यांशास्त्रमादरात्॥चिक्षेपकुंभकर्णायतेनचिछेदराक्षसः॥समुद्गरंदक्षहस्तंतेनघोरंननादसः॥सहृ
स्तःपतितोभूमौचूर्णनेकान्हरीन्कपीन्॥पर्वतमाश्रिताःसर्वेवानराभयपीडिताः॥रामराक्षसयोर्युद्धंप
श्यंतःपर्यवस्थिताः॥कुंभकर्णःछिन्नहस्तःशालमुद्यम्यवेगतः॥समरेराघवंहंतुंदुद्रावतमथाछि
नत्॥शालेनसहितंवामहस्तमैंद्रेणराघवः॥छिन्नबाहुमथायांतंनर्दंतंवीक्ष्यराघवः॥द्वावर्द्धचंद्रौनि
शितौवादायास्यपदद्वयं॥चिछेदपतितोपादौलंकाद्वारिमहास्वनौ॥निकृत्तपाणिपादोपिकुंभकर्णोति
भीषणः॥वडवामुखवद्वक्त्रंव्यादायरघुनंदनं॥अभिदुद्राववनिनदन्राहुश्चंद्रमसंयथा॥अपूरयन्निशितै
स्तस्यसायकैर्वदनंगृहूत्तमः॥वारपूरितवक्त्रोसौचक्रोशातिभयंकरः॥अथसूर्यप्रतिकाशमैंद्रंशरमनुत्तमं
वज्राशनिसमंरामश्चिक्षेपासुरमत्यवे॥सतंपर्वतसंकाशंस्फुरत्कुंडलदष्टकं॥चकर्त्तरक्षोधिपतेः
शिरोवृत्रमिवाशनिः॥तच्छिरःपतितल्लंकाद्वारिकायोमहोदधौ॥शिरोपरोधयत्द्वारंकायोनक्रांश्च
चूर्णयत्॥ततोदेवाःसऋषयोगंधर्वाःपन्नगाःखगाः॥सिद्धाश्चयक्षागुह्यकाश्चअप्सरोभिस्त्रराघवं॥

कुंभकर्णस्य वचः श्रुत्वा भ्रुकुटीविकटाननः ॥ दशग्रीवो [illegible] दिदं मा सन्नादुत्पतन्निव ॥ त्वमानीतेन मेज्ञानं बो
धनीयस्तु बुद्धिमान् ॥ मयाहृतं समीकृत्य पुत्रस्य यदि रोचते ॥ नो चेद्दृष्टस्तु पूर्वं निद्रा त्वां बाधते धुना ॥ रावण
स्य वचः श्रुत्वा कुंभकर्णो महाबलः ॥ [illegible] श्रेयमिति विज्ञाय तूर्णमुद्धाय निर्ययौ ॥ सलंघयित्वा प्राकारं महा
पर्वतसन्निभः ॥ निर्ययौ नगरात् तूर्णं नीघ[illegible]यन् हरिसैनिकान् ॥ सननादं महानादं समुद्रमभिनोदयन् ॥
वानरान् कंपयामास बाहुभ्यां भंजयन् रुषा ॥ कुंभकर्णं तदा दृष्ट्वा सपक्षमिव पर्वतं ॥ दुद्रुवुर्वानराः सर्वे कां
तं तकमिवारिबन्नाः ॥ भ्रमंतं हरिवाहिन्यां मुद्गरेण महाबलं ॥ कंपयंतं हरीन्वेगात् भंजयंतं समंततः ॥ चूर्ण
१०८ यंतं पुद्गरेण पाणिपादैरनेकधा ॥ कुंभकर्णं तदा दृष्ट्वा तदा पाणिर्विभीषणः ॥ ननाम चरणे तस्य भ्रातुर्ज्येष्ठस्य बु
द्धिमान् ॥ विभीषणेत्थं भ्रातर्मे दयां कुरु महामते ॥ रावणस्त्वमया भ्रात बेद्वुधा परिबोधितः ॥ सीतां देहीति १०८
रामाय रामः साक्षाज्जनार्दनः ॥ न शृणोति च मां हंतुं खड्गमुद्यम्य चोक्तवान् ॥ धिक्कृत्वां गच्छेति मां हत्वा पदा
भिरस्मागतः ॥ चतुर्भिर्मंत्रिभिः साकं रामं त्वां समागतः ॥ तच्छ्रुत्वा कुंभकर्णोपि ज्ञात्वा भ्रातरमागतं ॥ समा
लिंग्य च वत्स त्वं जीव रामपदाश्रय[illegible]कुलसंरक्षणार्थाय [illegible] राक्षसानां हिताय च ॥ महाभागवतोसि
त्वं पुरा मे नारदाच्छ्रुतं ॥ गच्छ तात तमयेदानीं दृ[illegible]बेन च किं पुनः ॥ मद्दीयो वा परो वापि मदमत्त विलोच

कुरु कर्म सुदुःकरं ॥ श्रुत्वा द्रुहसैन्द्रस्य वचनं परिदेवितं ॥ कुंभकर्णो जहासोच्चैर्विवचनं चेदमब्रवीत् ॥ पुरा मंत्र
विचारे ते गदितं यन्मया नृप ॥ तदद्य त्वामुपगतं फलं पापस्य कर्मणः ॥ पूर्वमेवं मया प्रोक्तो रामो नारायणः परः ॥
सीता च योगमायेति बोधितोसि न बुध्यसे ॥ एकदाहं वने पाको विशाल्लायां स्थितो निशि ॥ दृष्टो मया मुनिः साक्षा
न्नारदो दिव्यदर्शनः ॥ तमब्रुवं महाभाग कुतो गंतासि मे वद ॥ इत्युक्तो नारदः प्राह देवानां मंत्रणे स्थितः ॥ तत्रो
त्पन्नमुदंतं वो वक्ष्यामि शृणु तत्वतः ॥ युवाभ्यां पीडिता देवाः सर्वे विष्णुमुपागताः ॥ ऊचुस्ते देवदेवेशं त्वत्वान्नतो
समाहिताः ॥ जहि रावणमद्यो ऽस्मद्देवत्रैलोक्यकंटकं ॥ तथेत्याह महाविष्णुः सत्यसंकल्प ईश्वरः ॥ जातो रघुकुले
देवो राम इत्यति विश्रुतः ॥ स हनिष्यति वः सर्वानित्युक्त्वा प्रययौ मुनिः ॥ अतो जानीहि रामं त्वं परं ब्रह्म सनातनं ॥
त्यज वैरं भज स्वाद्यमायामानुषरूपिणं ॥ भजतां भक्तिभावेन प्रसीदति रघूत्तमः ॥ भक्तिर्जनित्री ज्ञानस्य भक्ति
र्मोक्षस्य प्रदायिनी ॥ भक्तिहीनेन यत्किंचित्कृतं सर्वमसत्समं ॥ अवताराः संति बहवो विष्णोर्लीलानुकारिणः ॥
॥ तेषां सहस्रसदृशो रामो ज्ञानमयः शिवः ॥ रामं भजंति निपुणा मनसा वचसानिशं ॥ अनायासेन संसारं ती
र्त्वा यांति हरेः पदं ॥ ये राममेव सततं भुवि शुद्धसत्वा ध्यायंति तस्य चरितानि पठंति संतः ॥ मुक्तास्त एव भवभोग
महाहिपाशैः सीतापतेः पदमनंतसुखं प्रयांति ॥ इति श्रीमदध्यात्मरामायणे उत्तमायुद्धकांडे सप्तमः सर्गः ॥

तेनैव प्रायसमवस्थितः ॥ पाषाणैः पादपैश्चैव पर्वताग्रैश्च वानराः ॥ युद्धायाभिमुखा भूत्वा ययुः ॥ वैयुयुत्स
वः ॥ रावणो विद्यायेरामबाणैर्विचोमहासुरः ॥ मातंग इव सिंहेन गरुडेनेव पन्नगः ॥ अभिभूतो जवद्राजा रा
घवेण महात्मना ॥ सिंहासनं समाविश्य राक्षसानिदमब्रवीत् ॥ मानुषेणैव मे मृत्युमाह पूर्वं पितामहः ॥
मानुषो हि न मां हंतुं शक्तोस्ति भुवि कश्चन ॥ ततो नारायणः साक्षात् मानुषो भून्न संशयः ॥ रामो दशरथेर्भूत्वा
मां हंतुं समुपस्थितः ॥ अनरण्येन यत्पूर्वं शप्तोहं राक्षसेश्वरः ॥ उत्पत्स्यते च मद्वंशे परमात्मा सनातनः ॥ ते
न त्वं पुत्रपौत्रैश्च बांधवैश्च समन्वितः ॥ हनिष्यसे न संदेह इत्युक्त्वा मां दिवं गतः ॥ स एव रामः संजातो मदर्थे मां
हनिष्यति ॥ कुंभकर्णस्तु मूढात्मा सदा निद्रावसंगतः ॥ तं विबुध्य महासत्वमानयंतु ममांतिकं ॥ इत्युक्ता
स्ते महाकायास्तूर्णं गत्वानुयत्नतः ॥ विबोध्य कुंभकर्णं तं निन्यू रावणसंनिधिं ॥ नमस्कृत्य स राजानमा
१०७ सनोपरि संस्थितः ॥ तमाह रावणो राजा भ्रातरं दीनया गिरा ॥ कुंभकर्ण निबोध त्वं महत्कष्टमुपस्थितं ॥ रामे १०७
ण निहताः शूराः पुत्रपौत्राश्च बांधवाः ॥ किं कर्तव्यमिदानीं मे मृत्युकालः समागतः ॥ एष दाशरथी रामः सु
ग्रीवसहितो बली ॥ समुद्रं सबलस्तीर्त्वा मूलं नः परिहंतति ॥ [illegible]सामरव्यतमास्ते हता वानरैर्युधि
॥ वा नराणां क्षयं युद्धे न पश्यामि कदाचन ॥ नाशयस्व महाबाहो यदर्थं परिबोधितः ॥ भ्रातुरर्थे महासत्व

ता॥ त्वत्प्रसादादहं शापात् विमुक्तास्मि कपीश्वर॥ शप्ताहं मुनिना पूर्वमप्सराकारणांतरे॥ आश्रमे यस्तु ते दुष्टः
कालनेमिर्महासुरः॥ रावणप्रेषितो मार्गे विघ्नं कर्तुं तवानघ॥ मुनिवेषधरो नासौ मुनिर्विप्रविहिंसकः॥ जहि दु
ष्टं गच्छ शीघ्रं द्रोणाचलमनुत्तमं॥ गच्छाम्यहं देवलोकं त्वत्स्पर्शाद्धूतकल्मषा॥ इत्युक्त्वा सा ययौ स्वर्गं हनुमानप्य
थाश्रमं॥ आगतस्तं समालोक्य कालनेमिरभाषत॥ किं विलंबेन महता तव वानरसत्तम॥ गृहाण मत्तो मंत्रांस्त्वं दे ६०
हि मे गुरुदक्षिणां॥ इत्युक्तो हनुमान् मुष्टिं दृढं बध्वाह राक्षसं॥ गृहाण दक्षिणां मे तामित्युक्त्वा निजघान कं॥ विसृ
ज्य मुनिवेषं स कालनेमिर्महासुरः॥ युयुधे वायुपुत्रेण नानामायाविधानतः॥ महामायिकदूतोऽसौ हनुमान्मायि
नां रिपुः॥ जघान मुष्टिना शीर्ष्णि निर्गतमूर्द्धा ममार सः॥ ततः क्षीरनिधिं गत्वा दृष्ट्वा द्रोणं महागिरिं॥ अदृष्ट्वा चौषधी
स्तत्र गिरिमुत्पाट्य सत्वरः॥ गृहीत्वा वायुवेगेन गत्वा रामस्य संनिधिं॥ उवाच हनुमान् रामं आनीतोयं महागि
रिः॥ यद्युक्तं कुरु देवेश विलंबो नात्र युज्यते॥ श्रुत्वा हनुमतो वाक्यं रामः संतुष्टमानसः॥ गृहीत्वा चौषधीः शीघ्रं सु
षेणं च महामतिः॥ चिकित्सां कारयामास लक्ष्मणाय महात्मने॥ ततः सुप्तोत्थित इव बुद्धा प्रोवाच लक्ष्मणः॥
तिष्ठ तिष्ठ क्व गंतासि हन्मीदानीं दशानन॥ इति ब्रुवंतमालिंग्य मूर्ध्नि चाघ्राय राघवः॥ मारुतिं प्राह वत्सायं त्वत्प्रसा
दान्महाकपे॥ निरामयं प्रपश्यामि लक्ष्मणं भ्रातरं मम॥ इत्युक्त्वा वानरैः सार्द्धं सुग्रीवेण समन्वितः॥ विभीषणेन

वृतिर्हि॥ तासामाधारभूतस्य लक्ष्मणस्य महात्मनः॥ मया चात्र यानवेत् किं वा शेषांशस्य हरेस्तनोः॥ तथा
पि मानुषभावमापन्नस्तदनुव्रतः॥ मूर्छितः पतितो भूमौ तमादातुं दशाननः॥ हस्ताभ्यां तोलयितुं शक्तो न बभू
ति विस्मितः॥ सर्वस्य जगतः सारं विराजं परमेश्वरं॥ कथं त्रैलोक्याश्रयं विष्णुं तोलयेल्लघुराक्षसः॥ गृहीतुं
कामं सौमित्रिं रावणं वीक्ष्य मारुतिः॥ आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना॥ तेन मुष्टिप्रहारेण जानुभ्या
मपतद्भुवि॥ आस्यैश्च नेत्रश्रवणैरुद्वमन् रुधिरं बहु॥ विघूर्णमाननयनो रथोपस्थ उपाविशत्॥ अपलक्ष्म
णमादाय हनुमान् रावणार्दितं॥ आनयद्रामसामीप्यं बाहुभ्यां परिगृह्य तं॥ हनुमतः सुहृत्त्वेन भक्त्या च प
रमेश्वरः॥ लघुत्वमगमद्देवो गुरूणां गुरुरप्यजः॥ सा शक्तिरपि तं त्यक्त्वा ज्ञात्वा नारायणांशकं॥ रावणस्य र
थं प्राप्यात्र रावणोपि शनैस्ततः॥ संज्ञामवाप्य जग्राह बाणासनमथारुषा॥ राममेवाभिदुद्राव दृष्ट्वा रामोपि १०४
१०४ तं क्रुधा॥ आरुह्य जगतां नाथो हनुमंतं महाबलं॥ रथस्थं रावणं दृष्ट्वा अभिदुद्राव राघवः॥ ज्याघोषमकरो 104
द्घोरं वज्रनिर्घोषनिःस्वनं॥ रामो गंभीरया वाचा राक्षसेंद्रमुवाच ह॥ राक्षसाधम तिष्ठ त्वं क्व गमिष्यसि मे
पुरः॥ कृत्वापराधमेवं मे सर्वत्र समदर्शिनः॥ येन बाणेन निहता राक्षसास्त्वदालये॥ तेनैव त्वां निष्यामि ति
ष्ठाग्रतो मम गोचरे॥ श्रीरामस्य वचः श्रुत्वा रावणो मारुतात्मजं॥ वहंतं राघवं संख्ये शरैस्तीक्ष्णैरताडय

सहस्रशः ॥ प्रविश्य वानरं सैन्यं ममंथुर्बलदर्पिताः ॥ त्रिशूलैर्भिंडिपालैश्च बाणैः खड्गैः परस्वधैः ॥ अन्यैश्च विविधैः
शस्त्रैर्निघ्नुर्हरियूथपान् ॥ ते पादपैः पर्वताग्रैर्नखदंष्ट्रैश्च मुष्टिभिः ॥ प्राणैर्विमोचयामासु सर्वराक्षसपुंगवान् ॥
रामेण निहताः केचित्सुग्रीवेण तथापरे ॥ हनूमता चांगदेन लक्ष्मणेन महात्मना ॥ यूथपैर्वानराणां ते निहताः स
र्वराक्षसाः ॥ रामतेजः समाविश्य वानरा बलिनो भवन् ॥ रामभक्तिविहीनानामेवं शक्तिः कुतो भवेत् ॥ स
[illegible]श्वरः सर्वमयो विधाता मायामनुष्यत्वविडंबनेन ॥ सदा चिदानंदमयोपि रामो युद्धादिलीलां वितनोति मा
[illegible] ॥ इति श्रीमदध्यात्मरामायणे युद्धकांडे पंचमोध्यायः ॥ श्रुत्वा युद्धे बलं नष्टं अतिकायमुखं महत् ॥ रावणो दुः
खसंतप्तः क्रोधेन महतावृतः ॥ निधायेंद्रजितं लंकारक्षणार्थं महाकृतिः ॥ स्वयं जगाम युद्धाय रामेण सह रा
क्षसैः ॥ दिव्यं स्यंदनमारुह्य सर्वशस्त्रास्त्रसंभृतं ॥ राममेवाभिदुद्राव राक्षसेंद्रो महाबलः ॥ वानरान् बहुशो ह
त्वा बाणैरशनीविषोपमैः ॥ पातयामास सुग्रीवप्रमुखान् वानरर्षभान् ॥ गदापाणिं महासत्त्वं तत्र दृष्ट्वा विभी
षणं ॥ उत्ससर्ज महाशक्तिं मयदत्तां विभीषणे ॥ तामापततीमालोक्य विभीषणविघातिनीं ॥ दत्ताभयं
रामेण वधार्हे नायमासुरः ॥ इत्युक्त्वा लक्ष्मणो भीमं चापमादाय वीर्यवान् ॥ विभीषणस्य पुरतः स्थितोकंप
इवाचलः ॥ सा शक्तिर्लक्ष्मणतनुं विवेद्यामोघशक्तितः ॥ यावंतः शक्तयो लोके मायायाः संभवाः

पित्वं दुराचारो भक्त्यापूतो न विध्यति ॥ मद्दाकं कुरुराजेंद्र कुलकौशल्यहेतवे ॥ तन्नु मान्यवतो वाक्यं हित
मुक्तं दशाननः ॥ न मर्शयति दुष्टात्मा कालस्य वशमागतः ॥ मानवं कृपणं रामं एकं शाखामृगाश्रयं ॥ स्व
मर्थमन्यसे केन हीनं पित्रा मुनिप्रियं ॥ रामेण प्रेषितो नूनं भाषसे त्वमनर्गलं ॥ गच्छ वृद्धोसि वंधुस्त्वं सोढुं
सर्वं त्वयोदितं ॥ इतो वाक्कणि परवीद हत्वेतद्वचस्तव मस्तव ॥ इत्युक्त्वा सर्वसचिवैः सहितः प्रस्थितस्सदा
रा ॥ प्रसादाग्रे समासीनोपश्यन्वानरसैनिकान् ॥ युद्धाय योजयन्सर्वं राक्षसान्समुपस्थितः ॥ रामोपि
102 धनुरादाय लक्ष्मणेन समाहृतं ॥ दृष्ट्वा रावणमासीनं कोपेन कलुषीकृतः ॥ किरीटिनं समासीनं मंत्रिभि
परिवेष्टितं ॥ शशांकार्द्धनिभेनैव वाणेनैकेन राघवः ॥ श्वेतछत्रसहस्राणि किरीटदशकं तथा ॥ चिच्छेद
निमिषार्द्धेन तदद्भुतमिवाभवत् ॥ लज्जितो रावणस्तूर्णं विवेशाभवनं स्वकं ॥ आहूय राक्षसान्सर्वान्प्रह १०२
१०२ स्तप्रमुखान्खलः ॥ वानरैः सह युद्धाय चोदयामास सत्वरः ॥ ततो भेरीमृदंगाद्यैः पणवानकगोमुखैः ॥
क्ष्विषोष्ट्रैः खरैः सिंहैः द्विपिभिः कृतवाहनाः ॥ खड्गशूलधनुःप्रासयष्टितोमरशक्तिभिः ॥ हिताः सर्वतो
लंकां प्रतिद्वारमुपाययुः ॥ तत्पूर्वमेव रामेण नोदिताः वानरर्षभाः ॥ वृक्षान्पगिरिशृंगाणि शिखराणि महां
ति च ॥ तरसोत्पाट्य विविधान्युद्धाय हरियूथपाः ॥ प्रेक्षमाणा रावणस्य तान्यनीकानि भागशः ॥ रा

वधद्वारामोदशाननवधायहि॥आगमिष्यतित्वंकायाः समीपंवानरैःसह॥प्रेषितोरावणेनत्वंचरोभूत्वारघू
त्तमं॥दृष्ट्वाशापाद्विनिर्मुक्तोबोधयित्वाचरावणं॥तत्वज्ञानंततोमुक्तोपरंपदमवाप्स्यसि॥इत्युक्तोगस्त्यमुनिनाशु
कोब्राह्मणसत्तमः॥बभूवराक्षसःसद्योरावणंप्राप्यसंस्थितः॥इदानींचारुरूपेणदृष्ट्वारामंसहानुजं॥रावणं
तत्वविज्ञानंबोधयित्वापुनर्द्रुतं॥पूर्ववत्ब्राह्मणोभूत्वास्थितोवैश्वानरैःसह॥ततःसमागमत्वृद्धोमाल्यवान्
राक्षसोमहान्॥बुद्धिमान्नीतिनिपुणोराज्ञोमातुःप्रियःपिता॥प्राहतंराक्षसंवीरंप्रशांतेनांतरात्मना॥शृणुराजन्
वचोमेद्यश्रुत्वाकुरुयथेप्सितं॥यदाप्रविष्टानगरींजानकीरामवल्लभा॥तदादिपुर्य्यांदृश्यंतेनिमित्तानिदशा
नन॥घोराणिनाशहेतूनितानिमेवदतःशृणु॥खराःस्तनितनिर्घोषामेघाःप्रतिभयंकराः॥शोणितेनाभिवर्षंति
छे ५ लंकामुष्णेनसर्वदा॥सीदंतिदेवलिंगानिविद्यंतिप्रचलंतिच॥कालिकापांडुरैर्दंतैःप्रहसंत्यग्रतःस्थिता॥खरागो
षुप्रजायंतेमूषकानकुलैःसह॥मार्जारेणतुयुध्यंतिपन्नगागरुडेनच॥करालोविकटोमुंडःपुरुषःकृष्णपिंगलः
कालेर ॥कालोगृहाणिसर्वेषांकालेत्ववेक्षते॥एतान्यन्यानिदृष्टानिनिमित्तान्युद्भवंतिच॥अतःकुलस्यरक्षार्थंशांतिंकु
रुदशानन॥सीतांसत्कृत्यसधनांरामायाशुप्रयच्छतो॥रामंनारायणंविद्धिविद्वेषंत्यजराघवे॥यत्पादपोतमाश्रि
त्यज्ञानिनोभवसागरं॥तरंतिभक्तिपूतास्तेततोरामोनमानुषः॥भजस्वभक्तिभावेनपरमंसर्वहृदालयं॥यद्य

नेन वने तिष्टन् स्वकर्म कृतं ॥ देवानामग्निरध्वर्यं विनाशाय सुरद्विषां ॥ चकार यज्ञं विततिं अविच्छि
न्नाम हामतिः ॥ राक्षसानां विरोधाय नृप शुको देवहितोद्यतः ॥ वज्रदंष्ट्र इति ख्यातस्तत्रैको राक्षसो महा
शु न् ॥ अंतरं प्रे[illegible]रातिष्टच्छुकापकरणोद्यतः ॥ कदाचिदागतोगस्त्यस्तस्याश्रमपदं मुने ॥ तेन संपूजितो ग
स्त्यो भोजनार्थं निमंत्रितः ॥ गते स्नातुं मुनौ कुंभसंभवे प्राप्य चांतरं ॥ अगस्त्यस्य रूपधृक् सोपि राक्षसः शुकम
ब्रवीत् ॥ यदि दास्यसि मे ब्रह्मन् भोजनं देहि सामिषं ॥ बहुकालं न भुक्तं मे मांसं छागांगसंभवं ॥ तथेति का
रयामास मांसभोज्यं सुविस्तरं ॥ उपविष्टे मुनौ भोक्तुं राक्षसोतीव सुंदरः ॥ शुकनार्या वपुर्धृत्वा तां चांत
र्मोहयन् खलः ॥ नरमांसं ददौ तस्मै सुपक्वं बहुविस्तरं ॥ दृष्ट्वैवांतर्द[illegible]धे राक्षसस्ततो दृष्ट्वा च कोपसः ॥ अ
मेध्यं मानुषं मांसं अगस्त्यः शुकमब्रवीत् ॥ अनर्हो मानुषं मांसं दत्तवानसि दुर्मते ॥ अयथात्वं राक्षसो नृ
१०२ 101 त्वा तिष्ट त्वं मानुषाशनः ॥ इति शप्तः पुरो नीता पापादगस्त्यं मुने त्वया ॥ इदानीं भाषितं मे यन्मांसं देहीति वि १०२
स्तरं ॥ तथैव दत्तं मे देव किं शापं प्रददास्यसि ॥ श्रुत्वा शुकस्य वचनं मुहूर्तं ध्यानमास्थितः ॥ ज्ञात्वा रक्षः
कृतं सर्वं ततः प्राह शुकं सुधीः ॥ तवापकारिणा सर्वं राक्षसेन कृतं त्विदं ॥ अविचार्यैव मे दत्तः शापस्ते मु
निसत्तम ॥ तथापि मे वचो मोघमेवमेतद्भविष्यति ॥ राक्षसं वपुरास्थाय रावणस्य सहायकृत् ॥ तिष्टता

स्वज्ञानवशतोवंधंप्रतिपद्यविमुह्यति॥तस्मात्त्वं शुद्धभावेनज्ञात्वात्मानंसदास्मर॥विसृज्यमानेस
र्वत्रपुत्रदारगृहादिषु॥निरयेष्वपिभोगः स्यात्‌ उर्वीर्भूकरतनावपि॥देहंलब्ध्वाविवेकाढ्यं द्विजत्वंवाविशेषतः॥त
त्रापिभारतेवर्षेकर्मभूमौसुदुर्लभे॥कोविद्वानात्मसात्कृत्वादेहंभोगानुगोभवेत्‌॥अतस्त्वंब्राह्मणोभूत्वापौल
स्त्यतनयोपिसन्‌॥अज्ञानी वसदाभोगान्‌ अनुधावसिकिंबुध॥इतःपरंवात्यक्त्वात्वंसर्वसंगं
समाश्रयः॥राममेवपरात्मानंभक्तिभावेनसर्वदासीतांसमर्प्यरामाय तत्पादानुचरोभव॥विमुक्तःस
र्वपापेभ्योविष्णुलोकंप्रयास्यसि॥नोचेद्भ्रमिष्यसेघोघः॥पुनरावृत्तिवर्जितः॥अंगीकुरुष्वमद्वाक्यंहित
मेववदामिते॥सत्संगतिंकुरुभजस्वहरिंशरण्यंश्रीराघवंमरकतोपलकांतिकांतं॥सीतासमेतमनि
शंधृतचापबाणं सुग्रीवलक्ष्मणविभीषणसेवितांघ्रिं॥इतिश्रीमदध्यात्मरामायणेउमा०युद्धकांडे
चतुर्थःसर्गः॥ श्रुत्वाशुकमुखोद्गीतंवाक्यमज्ञाननाशनं॥रावणःक्रोधताम्राक्षोदहन्निवतमब्रवीत
॥अनुजीव्यसिदुर्बुद्धेगुरुवद्भाषसेकथं॥शासिताहंत्रिजगतां त्वंमांशिक्षन्‌नलज्जसे॥इदानीमेवहन्मि
त्वांकिंतुपूर्वकृतंतव॥स्मरामितेनरक्षामित्वांयद्यपिवधोचितं॥इतोगच्छविमूढत्वमेवंश्रुत्वातुनमेहतम॥
महाप्रसादइत्युक्त्वावेपमानोययौगृहं॥शुकोपिब्राह्मणः पूर्वंवसिष्ठोब्रह्मवित्तमः॥वानप्रस्थविधा

ने
वबावैरः॥ … आरंभो नाम राजेंद्र कोटियूथपनायकः॥ पनसश्च महावीर्यो मैंदश्च द्विविदस्तथा॥ नलश्च से
तुकर्त्ता सौ किंच कर्मसु तोवली॥ वानराणां बलं नैवा संख्याने वा कदीश्वरः॥ शूराः सर्वे महाकायाः सर्वेयुद्धा
निकोविदाः॥ वानराः सर्वे चूर्णयितुं … तुल्ले कारद्रोणाः सह॥ एतेषां बलसंख्यानं प्रत्येकं विच्यते शृणु येषां
कोटिसहस्राणि नवपंचव सप्त च॥ तथा त्रिंशत्सहस्राणि तथा वृंद शतानि च॥ सुग्रीवसचिवानां ते बलं मे
ततश्च कीर्त्तितं॥ अन्येषां तु बलं नाहं वक्तुं शक्तोस्मि रावण॥ रामो न मानुषः साक्षादादिनारायणः परः॥ सी
ता साक्षाज्जगद्धात्री विद्यत्ति ज्ञिगदात्मिका॥ तस्यामेव समुत्पन्नं जगत्स्थावरजंगमं॥ तस्माद्रामश्च
सीता च जगतस्तस्थुषश्च तौ॥ पितरौ पृ…थिवीपाल तयोर्वैरं कथं भवेत्॥ अयाता त्वया नीता जगन्माते
१०० व…नकी॥ ज्ञाणनाशिनि संसारे घोरे रे ज्ञाण तेगुरे॥ पंचभूतात्मके राजन्नुपंचविंशति तत्त्वके॥ मलमांसा १००
स्थिदुर्गंधे भूयिष्ठे देहे कृतालये॥ कैवास्थ्याव्यतिरिक्तेस्य कायेन्नवजडात्मके॥ यत्कृते वध्रस्रहत्यादिपातकानि
कृतानि ते॥ भोगभोक्ता तु यो देहः स देहोऽत्र पतिष्यति॥ पुण्यपापे समायाते जीवेन सुखदुःखयोः॥ कारण
योगादिनात्मनः कुरुते निद्रा॥ यावद्देहोस्मि कर्त्तास्मीत्यात्मानं कुरुते वशः॥ अध्यासस्तावदेव स्याज्जन्म
नाशादिसंभवः॥ तस्मात्त्वं त्यज देहादौ अभिमानं महामते॥ आत्मातिनिर्मलः शुद्धो वित्तानात्माचलोम

तयोर्विद्यते संधिर्देवदानवयोरिव ॥ पुरप्राकारमायांति क्षिप्रमेकतरं कुरु ॥ सीतां चास्मै प्रयच्छाशु युद्धं वा दीयतां प्रभो
॥ मैमा हरामस्त्वं बुद्धिरावणं मद्वचः शृणु ॥ यद्बलं च समाश्रित्य सीतामेहृतवानसि ॥ तद्दर्शय यथाकामं ससैन्यः
सहबांधवः ॥ श्वः कालेन नगरीं लंकां सप्रकारां सतोरणां ॥ राक्षसं च बलं पश्य शरैर्विध्वंसितं मया ॥ घोरं रोषमहं मो
क्ष्ये बलं धारय रावण ॥ इत्युक्तोपरराम सौ रामः कमललोचनः ॥ एकस्यानेगता यत्र चत्वारः पुरुषर्षभाः ॥ श्रीरामो ल
क्ष्मणश्चैव सुग्रीवश्च विभीषणः ॥ एकस्तु सम समर्थास्तेषां लंकां नाशयितुं प्रभो ॥ उत्पाटयन्स्मीकरणो सर्वे
तिष्ठंतु वानराः ॥ तस्याप्याद्य बलं दृष्टं रूपं प्रहरणानि च ॥ बधिष्यंति पुरं सर्वं एकस्मिंस्तु ते त्रयः ॥ पश्य पवानरसेनां त्वं
त्रसंख्यातो प्रपूरितां ॥ गर्जंति वानरास्तत्र पश्य पर्वतसंनिभाः ॥ न शक्तास्ते गणयितुं प्राधान्येन ब्रवीमि ते ॥ एषयो
भिमुखो लंकां नर्दन्तिष्ठति वानरः ॥ यूथपानां सहस्राणां शतेन परिवारितः ॥ सुग्रीवसेनाधिपति नीलो नामा
ग्निनंदनः ॥ एष पर्वतशृंगाभः पद्मकिंजल्कसन्निभः ॥ स्फोटयत्यभिसंरब्धो लांगूलं च पुनः पुनः ॥ युवरा रना
जोंगदो नाम वालिपुत्रोतिवीर्यवान् ॥ येन दृष्टा जनकजा रामस्यातीववल्लभा ॥ हनुमानेष विख्यातो हतो येन
तवात्मजः ॥ श्वेतो रजतसंकाशो महाबुद्धिर्वरांकारः ॥ तूर्णं सुग्रीवमागत्य पुनर्गच्छति वानरः ॥ यस्त्वेष सिं
हसंकाराः पश्यपत्यतुलविक्रमः ॥ रंभो नाम महासत्त्वो लंकां नाशयितुं क्षमः ॥ एष पश्यति वै लंकां दिधक्षन्निव

मंघाद्व्यतिरिक्त ईश्वरः ॥ इंजनेयोनु ... उपाधितः सदा ... ज्ञानमितीनि मुच्यसे ॥ एते स्मात्वं इति कनो ह्रसाध
नेवद्रूपेण शृणु श्रावद्विती महामते ॥ ... ज्ञानिभिः सुविज्ञेय न ... ज्ञानवेत्तज्ञान सतीवनिर्मलं ॥ विशुद्धत्वात्तुम
तोमिवेत्ततः ॥ सम्यक्पृविदित्वा परमं पदं व्रजेत ॥ ग्यतोभ्जस्त्वाद्य ह्रिरिरभापतिं रामं पुराणं प्रकृतेः परं विदुः ॥ किर
रुख्य जमोर्व्यी हृदि ... शत्रुनावनां भजस्व रामं शरणं गतिप्रियं ॥ सीतां पुरस्कृत्य सपुत्रबांधवो रामं नम
स्कृत्य विमुचसे भयात ॥ रामं परात्मानमभावयन् जनो भक्त्या हृदिस्थं सुखरूपमद्वयं ॥ कथं परे तीरमवा
प्नुयाज्जने ऽ न वा बुधे दुःखतरंगमालिनः ॥ नो चेत्तत दृक्ता नमयेन वह्निनाज्वलं तमात्मानमरक्षितारि
वेत ॥ न पस्य बाधः स्वकृतैश्च पातकैः ॥ विमोक्षशंकां नु चेतेन विष्यति ॥ श्रुत्वामृतास्वादु समानभाषितं त
द्वायुसूनोर्दशकंधरोऽसुरः ॥ अमृष्यमाणोऽतिरुषा कपीश्वरं जगौ तविलोचनोज्वलन् ॥ कथं ममाग्रे विल्ल
पस्यभीतवत्प्लवंगमानाम ऽधमोसि दुष्टधीः ॥ क एष रामः कतमो वने चरो निहन्मि सुग्रीवयुतं नरा
धमं ॥ त्वां वाद्य हत्वा जनकात्मजां ततो निहन्मि रामं सह लक्ष्मणं ततः ॥ सुग्रीवमग्ने वलिनं कपीश्व
रं सवानरैर्हन्म्यचिरेण वानर ॥ श्रुत्वा दशग्रीव ... वचः समारुतिर्विवृद्धकोपेन दहन्निवासुरं ॥ न
मे समा रावणकोटयोऽधमा रामस्य दासोऽहमपारविक्रम ॥ श्रुत्वातिकोपेन हनूमतो वचो दशाननो
श्रु

८७ 99

जगदर्दं:४ ८.७१

धरासुतांमार्गयितुंदिशोदश॥तत्राह्येकःपवनात्मजःकपीःसीतांविचिन्वन्शनकैःसमागतः॥दृष्ट्वाम
यापयत्पलाशलोचनासीताकपित्वाच्छिपिनंविनाशितं॥दृष्ट्वा ततोहंरक्षसान्समागतान्मांहंतुकामान्धृतचाप
सायकान्॥मयाहतास्तेपरिरक्षितावपुः॥प्रियोहिदेहोखिलदेहिनांप्रभो॥बद्धास्त्रपाशेननिबध्य[redacted]मांत
तःसमागमन्मेघनिनादनामकः॥स्पृष्ट्वैवमांब्रह्मवरप्रभावतस्त्यक्त्वागतंसर्वमवैहिरावण॥[redacted]तथाप्यहंबद्ध
इवागतोहंप्रवक्तुंकामस्त्वकरुणरसार्द्रधीः॥विचार्यलोकस्यविवेकतोगतिंनराक्षसीबुद्धिमुपैहिरावण॥
दैवीगतिंसंसृतिमोक्षहेतुकींसमाश्रयात्यंतहितायदेहिनः॥त्वंब्रह्मणोह्युत्तमवंशसंभवःपौलस्त्यपु-
त्रोसिकुबेरबांधवः॥देहात्मबुद्ध्यापिचपश्यराक्षसोनास्यात्मबुध्याकिमुतराक्षसोनहि॥शरीरबुद्धींद्रियदुः
खसंततिर्नतेनचत्वंतवनिर्विकारतः॥अज्ञानहेतोश्चतथैवसंततेरसत्यमस्याःस्वपतोहिदृश्यवत्॥इदंतुस
त्यंतवनास्तिविक्रि[redacted]याविकारहेतुर्नचतेद्वयात्मनः॥यथानभःसर्वगतोनलिप्यतेतथा[redacted]वान्देहगतोपि
सूक्ष्मतः॥देहेंद्रियप्राणशरीरसंगतिः॥स्वात्मेतिबुध्वाखिलबंधभाग्भवेत्॥चिन्मात्रमेवाहमजो[redacted]
[redacted]हमक्षरोह्यानंदभावोहमितिप्रमुच्यते॥देहोप्यनात्मापृथिवीविकारजोनप्राणआत्मानिलएषए
वसः॥मनोप्यहंकारविकारएवजोनचापिबुद्धिःप्रकृतेर्विकारजा॥आत्माचिदानंदमयोविकारवान्देहादि

रंसागरंवीक्ष्यदुःखितास्तरिष्यामःकथंघोरंसागरंवरुणालयं॥हंतव्योस्माभिरद्यैवरावणोराक्षसाधमः॥इ
तिचिंताकुलाःसर्वेरामपार्श्वेव्यवस्थिताः॥रामःसीतामनुस्मृत्यदुःखेनमहतावृतः॥विलप[illegible]नकीं
सीतांबहुधाकार्यमानुषः॥अद्वितीयश्चिदात्मैकःपरमात्मासनातनः॥यस्तज्ज्ञानातिरामस्यस्वरूपंत
त्वतोजनः॥तंनस्पृशंतिदुःखादिकिमुतानंदमव्ययं॥दुःखहर्षभयक्रोधलोभमोहमदादयः॥अज्ञानलिं
गान्येतानिकुतःसंतिचिदात्मनि॥देहाभिमानिनोदुःखंनादेहस्यपरात्मनः॥संप्रसादेद्वयाभावात्सुख सुषो प्रायेच
मात्रंहिदृश्यते॥बुद्ध्याद्यभावात्संशुद्धेर्दुःखंतत्रनदृश्यते॥अतोदुःखादिकंसर्वंबुद्धेरेवनसंशयः॥रामः
परात्मापुरुषःपुराणोनित्योदितोनित्यसुखोनिरीहः॥तथापिमायागुणसंगतोसौसुखीवदुःखीवविभाव्यते
८२ ऽबुधैः॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेप्रथमःसर्गः॥लंकायांराव
णेनदृष्ट्वाकृतंकर्महनूमता॥दुष्करंदेवतैर्वापिक्रियाकिंचिदवाङ्मुखः॥आहूयमंत्रिणःसर्वानिदंवचनमब्र ८४
९४ वीत्॥हनूमताकृतंकर्मभवद्भिर्दृष्टमेवतत्॥प्रविश्यलंकांदुर्धर्षांदृष्ट्वासीतांदुरासदां॥हत्वाचराक्षसान्वीरान्
ऽक्षंमंदोदरीसुतं॥दग्ध्वालंकामशेषेणलंघयित्वाचसागरं॥युष्मान्सर्वानतिक्रम्यस्वस्थोगात्पुनरेवसः॥
किंकर्तव्यमतोस्माभिर्यूयंमंत्रविशारदाः॥मंत्रयध्वंप्रयत्नेनयत्कृतंमेहितंभवेत्॥रावणस्यवचःश्रुत्वा

द्विविदश्च॥ नलो नीलः सुखेणश्च जांबवांश्च तथापरे॥ सर्वे गछंतु सर्वत्र सेनायाः शत्रुघातिनः॥ इत्याज्ञाप्य हरीन्
रामः प्रतस्थे सह लक्ष्मणः॥ सुग्रीवसहितो हृष्टः तत्सेनामध्यगतो विभुः॥ वारणेंद्रनिभाः सर्वे वानराः कामरूपिणः॥
खेल्लंतः परिगर्जंतो जग्मुस्ते दक्षिणां दिशं॥ भक्षयंतो ययुः सर्वे फलानि च मधूनि च॥ ब्रुवंतो रा[illegible]स्याग्रे हनिष्यामो परिवृंतो ४
घरावणं॥ एवं ते वानरश्रेष्ठा गच्छंत्यतुलविक्रमाः॥ हरिभ्यामुह्यमानौ तौ शुशुभाते रघूत्तमौ॥ नक्षत्रैः सेवितौ
यद्वत् चंद्रसूर्याविवांबरे॥ आवृत्य पृथिवीं कृत्स्नां जगाम महती चमूः॥ प्रस्फोटयंतः पुच्छाग्रान् उद्वहंतश्च पाद
पान्॥ शैलानारोहयंतश्च जग्मुर्मारुतवेगतः॥ असंख्याता[illegible]सर्वत्र वानराः॥ परिपूरिताः॥ हृष्टाः ते जग्मुरत्यर्थं
रामेण परिपालिताः॥ गत्वा चमूर्दिवारात्रं केचिन्नास्य पतत्क्षणं॥ काननानि विचित्राणि पश्यन् मलयसह्ययोः॥ गते
सह्यं समतिक्रम्य मलयं च तथा गिरिं॥ आययुश्चानुपूर्वेण समुद्रं भीमदर्शनं॥ अवतीर्य हनुमतः रामः सुग्रीवसं
युतः॥ सलिलाश्यासमासाद्य रामो वचनमब्रवीत्॥ आगता[illegible]स्मो वयं सर्वे समुद्रं मकरालयं॥ इतोयं तु म
ष्ठाकं नो निरुपायेन वानराः॥ मोहयं[illegible]न्ति[illegible]व सर्वेषां मायामानुषविग्रहः॥ अत्र सेनानिवेशोस्तु मं
त्रयामास पलारेण॥ मत्वा रामस्य वचनं सुग्रीवः सागरांतिके॥ सेनां निवेशायतुष्णीं घोरं रक्षितं कपिकुंज
रैः॥ ते पश्यंतो निषेदुस्तं सागरं भीमदर्शनं॥ महोच्चततरंगाढ्यं भीमनक्रभयंकरं॥ अगाधं गगनाका

रक्षिवं॥संकल्पनियतोभूत्वाग लावाराणसीनरः॥ आनीयगंगासलिलंरामेश्वमभिषिच्यच॥ समुद्रेक्षिप्तं
रोवृक्षप्राप्नोत्यसंशयं॥ कृतानिप्रथमेनाह्ना योजनानां चतुर्दश॥ द्वितीयेन तथाचाह्ना योजनानांतुविंशति
॥ तृतीयेन तथा चाह्नायोजनान्येकविंशति॥ चतुर्थेन तथा चाह्ना द्वाविंशतिरितुश्रुतं॥ पंचमेनात्रयोविंशद्योजनानांत
मंततः॥ बबंधसागरेसेतुंनलोवानरसत्तमः॥ तेनैवजग्मुःकपयोजनानांशतंद्रुतं॥ असंख्याताःसुवेलाद्रिंरुरुधुः श्लो दिशो वे: ह
प्लवगोत्तमाः॥ आरुह्यमारुतिंरामोलक्ष्मणोप्यंगदंतथा॥ दृष्ट्वाःराघवोलंकांआरुरोहेसुवेलंमहत्॥ दृष्ट्वालंकां
सुविस्तीर्णांनानाचित्रध्वजाकुलां॥ चित्रप्रासादसंबाधांस्वर्णप्राकारतोरणां॥ परिखाभिःशतघ्नीभिःसंक्रमैश्चवि
राजितां॥ प्रासादोपरिविस्तीर्णेप्रदेशेदशकंधरः॥ मंत्रिभिःसहितोवीरैःकिरीटदशकोज्वलः॥ नीलाद्रिशिख
राम
राकारःकालमेघसमप्रभः॥ रत्नदंडैःसितछत्रैरनेकैरुपशोभितः॥ एतस्मिन्नंतरे व[illegible]द्धोमुक्तोरामेणवै राम
११ मुक्तः॥ वानरैस्ताडितःसम्यक्रुदन्नाननमुपागतः॥ प्रहसन्रावणःप्राहपीडितःकिंपरैःशुक॥ रावणस्यवचः
श्रुत्वाशुकोवचनमब्रवीत्॥ सागरस्योत्तरेतीरेत्त्वेवंतेवचनंतथा॥ ततस्तूर्णंकपयोगृहीत्वामांक्षणात्ततः॥
मुष्टिभिर्नखदंडैश्चहंतुंलोटुंप्रचक्रमुः॥ ततोमांरामरक्षेतिक्रोशंतंरघुपुंगवः॥ विसृज्यतामितिप्राहविसृ
ष्टोहंकपीश्वरैः॥ ततोहमागतोभीत्यादृष्ट्वातद्वानरंबलं॥ राक्षसानांबलौघस्यवानरेंद्रबलस्यच॥ ते

र्भूत्वपतितस्तव॥ त्वामहंमाययाछन्नंलीलयामानुषाकृतिं॥ जडबुद्धिर्जडोमूर्खःकथंजानामिनिर्गुणं॥ इदंएव
हिमूर्खाणांसन्मार्गःप्रापकःप्रभो॥ प्रपन्नामामरश्रेष्ठपमूनांनकुटंयथा॥ शरणंतेव्रजामीशशरण्यंजनव
त्सलं॥ अतोन्यंदेहिमेरामलंकामार्गंदयानिधे॥ श्रीरामउवाच॥ अमोघोयंमहाबाणःकस्मिन्देशेनिपात्यतां॥ लक्ष्यं
दर्शयमेशीघ्रंबाणस्यामोघपातिना॥ रामस्यवचनंश्रुत्वाकरेदृष्ट्वामहाशरं॥ महोदधिर्महातेजाराघवंवाक्य
मब्रवीत्॥ रामोत्तरप्रदेशात्तुद्रुमकुल्यइतिश्रुतः॥ प्रदेशास्तत्रवहवःपापात्मानोदिवानिशं॥ बाधंतेमांरघुश्रेष्ठ
वानरः ७ तत्रतेपात्यतांशरः॥ रामेणसृष्टोबाणस्तुक्षणाद्दानीरमंडलं॥ हत्वापुनःसमागत्यतूणीरेपूर्ववत्संस्थितः॥ ततो १८
ब्रवीद्रघुश्रेष्ठंसागरोविनयान्वितः॥ नलःसेतुंकरोत्वस्मिन्जलेमेविश्वकर्मणः॥ सुतोधीमान्समर्थोस्मिन्का
र्येलब्धवरोहरिः॥ कीर्तिंजानंतुतल्लोकाःसर्वलोकमलापहां॥ इत्युक्त्वाराघवंनत्वाययौसिंधुरदृश्यतां॥ ततोराम
व स्तुसुग्रीवलक्ष्मणाभ्यांसमन्वितः॥ नलमाज्ञापयच्छीघ्रंवानरैःसेतुबंधने॥ ततोतिहृष्टःप्लवगेंद्रयूथपैर्महानगेंद्र
ति प्रमेयुतोनलः॥ ववंधसेतुंशतयोजनायतंसुविस्तृतंपर्वतपादपैर्दृढं॥ इतिश्रीमदध्यात्मरामायणेउमा०लंका
कांडेतृतीयःसर्गः॥ सेतमारभमाणस्तुतत्ररामेश्वरंशिवं॥ संस्थाप्यपूजयित्वाहरामोलोकहितायच॥ प्र
णमेत्सेतुबंधेयोदृष्ट्वारामेश्वरंहरं॥ ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः॥ सेतुबंधेनरःस्नात्वादृष्ट्वारामेश्व

द्रोषक्रांतलोचनः॥पश्यलक्ष्मणदुष्टोसौवारिधिर्मामुपागतं॥नाभिनंदतिदुष्टात्मादर्शनार्थंममानघ॥जा
नातिमानुषोयंमेकिंकरिष्यतिवानरैः॥अद्यपश्यमहाबाहोशोषयित्वामिवारिधिं॥पादेनैवगमिष्यंतिवानरा
विगतज्वराः॥इत्युक्त्वाक्रोधताम्राक्षःआरोपितधनुर्द्धरः॥तूणीराद्बाणमादायकालाग्निसदृशप्रभं॥संधाय
चापमाकृष्यरामोवाक्यमथाब्रवीत्॥पश्यंतुसर्वभूतानिरामस्यशरविक्रमं॥इदानींभस्मसात्कुर्यांसमुद्रंस
रितांपतिं॥एवंब्रुवतिरामेतुसशैलवनकानना॥चचालवसुधाद्यौश्चदिशश्चतमसावृताः॥चक्षुभेसाग
रोवेलांभयात्योजनमत्यगात्॥तिमिनक्रझषामीनाःप्रतप्ताःपरितत्रसुः॥एतस्मिन्नंतरेसाक्षात्सागरो
दिव्यरूपधृक्॥दिव्याभरणसंपन्नःस्वभासाभासयन्दिशः॥स्वांतस्थेदिव्यरत्नानिकराभ्यांपरिगृह्यतं॥
५८ पादयोःपुरतःक्षिप्त्वारामस्योपायनंबहु॥दंडवत्प्रणिपत्याहरामंरक्तांतलोचनं॥त्राहित्राहिजगन्नाथरा ५८
मत्रैलोक्यरक्षक॥जडोहंरामतेसृष्टःसृजतानिखिलंजगतः॥स्वभावमन्यथाकर्तुंकःशक्तोदेवनिर्मितं॥
98 स्थूलानिपंचभूतानिजडान्येवस्वभावतः॥सृष्टानिभवतैतानित्वदाज्ञांलंघयंतिन॥तामसादहंकारात्
भूतानिप्रभवंतिहि॥कारणानुगमात्तेषांजडत्वंनामसंस्थितः॥निर्गुणस्त्वंनिराकारोयदामायागुणान्प्रभो॥
लीलयांगीकरोषित्वंतदावैराजनामवान्॥गुणात्मनोविराजश्चसत्वाद्देवाबभूविरे॥रजोगुणात्प्रजेशाद्यामत्तो

वैलक्ष्मणेन विशेषतः ॥ साधुसाध्विति ते सर्वे वानरास्तुष्टुवुर्मुहुः ॥ सुग्रीवोपि परिष्वज्य विभीषणमथाब्रवीत् ॥ विभीष
णवयं सर्वे रामस्य परमात्मनः ॥ किंकरास्तस्य मुख्यस्त्वं भक्त्या रामपरिग्रहात् ॥ रावणस्य विनाशे त्वं साहाय्यं कर्तुम
र्हसि ॥ विभीषण उवाच ॥ अहं कियान्सहायत्वे रामस्य जगतीपतेः ॥ किंतु दास्यं करिष्येहं भक्त्या शक्त्या त्वया सह ॥
प्रेषितः ४ दशग्रीवेण संदिष्टः शुको नाम महासुरः ॥ संस्थितोंबरे वाक्यं सुग्रीव[illegible]मिदमब्रवीत् ॥ त्वामाह रावणो राजा भ्रातरं
राक्षसाधिपः ॥ महाकुलप्रसूतस्त्वं राजासि वनर[illegible]चारिणां ॥ मम भ्रातृसमानस्त्वं तव ना[illegible]स्त्यर्थविप्लवः ॥ अहं
रा यद्याहरं भार्यां राजपुत्रस्य किं तव ॥ किष्किंधां याहि हरिभिर्लंका शक्या न दैवतैः ॥ प्राप्तुं किं मानवैरल्पसारैर्वानरयूथ म
पैः ॥ तं प्राप्य[illegible]यं तं वचनं तूर्णमुत्प्लुत्य वानराः ॥ प्रापद्यंत तदा क्षिप्रं निहंतुं दृढमुष्टिभिः ॥ वानरैर्हन्यमानस्तु शुको राममभा
ष्याब्रवीत् ॥ न दूतान्घ्नंति राजेंद्र वानरान्वारय प्रभो ॥ रामः श्रुत्वा तदा वाक्यं शुकस्य परिदेवितं ॥ मा वधिष्टेति रामस्ता
न्वारयामास वानरान् ॥ पुनरंबरमासाद्य शुकः सुग्रीवमब्रवीत् ॥ ब्रूहि [illegible]जन दशग्रीवं किं वक्ष्याम्यभिवनाम्यहं ॥ सु
ग्रीव उवाच ॥ यथा वाली मम भ्राता तथा त्वं राक्षसाधम ॥ हंतव्यस्त्वं मया यत्नात्सपुत्रबलवाहनः ॥ ब्रूहि मे
रामचंद्रस्य भार्यां हृत्वा क्व यास्यसि ॥ ततो रामाज्ञया धृत्वा शुकं बध्वा त्वरन्नयत् ॥ शार्दूलोपि ततः पूर्वं दृष्ट्वा कपिब
लं महत् ॥ यथावत्कथयामास रावणाय स रावणः ॥ दीर्घं चिंतापरो भूत्वा निःश्वसन्नास मंदिरे ॥ ततः समुद्रमावे

इति लोकापवादो मे न विष्यति न संशयः ॥ तस्मादाहूय नद्रंते गत्वा युद्धाय वालिनं ॥ बाणेनैकेन तं हत्वा राज्ये त्वामभिषे
क्ष्ये ॥ तथेति गत्वा सुग्रीवः किष्किंधोपवनं द्रुतं ॥ कृत्वा शब्दं महानादं तमाहूयत वालिनं ॥ तच्छ्रुत्वा भ्रातृनिनादं रोष
ताम्रविलोचनः ॥ निर्जगाम महावेगो यत्र सुग्रीवो यत्र वानरः ॥ तमापतंतं सुग्रीवः शीघ्रं वक्षस्यताडयत् ॥ सुग्री
पुरि॰ ३४ वमपि पस्यां जघान क्रोधमूर्छितः ॥ वालिनमपि सुग्रीव एवं क्रुद्धौ परस्परं ॥ अयुध्येतामेकरूपौ दृष्ट्वा रामोपि वि
स्मितः ॥ न मुमोच तदा बाणं सुग्रीववधशंकया ॥ ततो दुद्राव सुग्रीवो वमन्रक्तं भयाकुलः ॥ वाली स्वभवनं
प्रायात् सुग्रीवो राममब्रवीत् ॥ किं मां घातयसे राम शत्रुणा भ्रातृरूपिणा ॥ यदि मद्धननेच्छा स्यात् त्वमेव जहि मां
विभो ॥ एवं मे प्रत्ययं कृत्वा सत्यवादी रघूत्तम ॥ उपेक्षसे किमर्थं मां शरणागतवत्सल ॥ श्रुत्वा सुग्रीववचनं
६५ रामः साश्रुविलोचनः ॥ आलिंग्य मास्मा नैषीस्त्वं दृष्ट्वा वामेकरूपिणौ ॥ मित्रघातित्वमाशंकामुक्तेवान्सायकं ६५
नहि ॥ इदानीमेव ते चिह्नं करिष्ये भ्रमशांतये ॥ गत्वाहूय पुनः शत्रुं हतं द्रक्ष्यसि वालिनं ॥ रामोहं त्वां शपे भ्रात
र्हनिष्यामि रिपुं क्षणात् ॥ इत्याश्वास्य स सुग्रीवं रामो लक्ष्मणमब्रवीत् ॥ सुग्रीवस्य गले पुष्पमालामामुच्य पु
ष्पितां ॥ प्रेषयस्व महाभागं सुग्रीवं वालिनं प्रति ॥ लक्ष्मणस्तु तदा बध्वा गच्छ गच्छेति सादरं ॥ प्रेषयामास
सुग्रीवं सोपि गत्वा तथाकरोत् ॥ पुनरप्यद्भुतं शब्दं कृत्वा वालिनमाहूयत ॥ तच्छ्रुत्वा विस्मितो वालिः क्रोधर्क

द्वाणीम धुरंभायतिक्षणं॥ सत्वब्रह्मा हरो सुरापोवाभ्युच्यते सबीपातकैः॥ न कांक्षे विजयं राम न च दारसुखादिकं॥ भक्ति नवर
मेव सदा कांक्षे त्वयि बंधविमोचिनी॥ त्वन्मायाकृतसंसारस्त्वदंशोहं रघूत्तम॥ त्वत्पादभक्तिमादिश्यत्राहिस्मीतानि
संकटात्॥ पूर्वं मित्राण्युदासीनाः त्वन्मायावृतचेतसः॥ यासमेव भवत्पाद दर्शनादेव राघव॥ सर्वं ब्रह्मैव मे भा
ति क्व मित्रं क्व च मे रिपुः॥ यावत् त्वन्मायया बद्धस्तावद्गुणविशेषता॥ सा यावदस्ति नाना त्वं तावद्भवति नान्यथा॥
यावन्नानात्वमज्ञानात्तावत्कालकृतं भयं॥ अतो विद्यामुपास्तेयः सोंऽधे तमसि मज्जति॥ मायामूलमिदं सर्वं पु
त्रदारादिबंधनं॥ अतो त्सारमेमायां त्वं दासीत वरघूत्तम॥ त्वत्पादपद्मार्पितचित्तवृत्तिस्त्वन्नामसंगीतकराच वैदेहीरम
वाणी॥ त्वद्भक्तिसेवानिरतौ करौ मे त्वदंगसंगं लभतां मदंगं॥ त्वन्मूर्तिभक्तान्स्वगुरुं च चक्षुः पश्यत्वजस्रं स श्रृणोतु
कर्णौः॥ त्वज्जन्मकर्माणि च पादयुग्मं व्रजत्वजस्रं तव मंदिराणि॥ अंगानि ते पादरजो विमिश्रतीर्थानि बिभ्रत्वहिशत्रु
केतो॥ शिरस्त्वदीयं भवपद्मजाद्यैर्जुष्टं पदं राम नमत्वजस्रं [redacted]॥ इति श्रीमदध्यात्मरामाय
णे उमामहेश्वरसंवादे किष्किंधाकांडे प्रथमः सर्गः॥ इत्थं स्वात्मपरिष्वंगनिर्धूताशेषकल्मषं॥ रामः सु
ग्रीवमालोक्य सस्मितं वाक्यमब्रवीत्॥ मायां मोहकरीं तस्मिन्वितन्वन्कार्यसिद्धये॥ सखे त्वदुक्तं यत्तन्मे सत्य
मेव न संशयः॥ किं तु लोका वदिष्यंति मामेव रघुनंदनं॥ कृतवान्किं कपीन्द्राय सख्यं कृत्वाग्निसाक्षिकं॥

तालच्छेदः २

त्रि

पश्यास्थिरस्तस्य दुंदुभेः पर्वतोपमं॥ तत्क्षेपणाय दाशरथे शक्तस्त्वं वालिनो वधे॥ इत्युक्त्वा दर्शयामास शिर
स्तद्गिरिसंनिभं॥ दृष्ट्वा रामः स्मितं कृत्वा पादांगुष्ठेन चाक्षिपत्॥ दशयोजनपर्यंतं तदद्भुतमिवाभवत्॥ साधुसाध्वि
ति संप्राह सुग्रीवो मंत्रिभिः सह॥ पुनरप्याह सुग्रीवो रामं भक्तपरायणं॥ एते ताला महासाराः सप्तपश्यरघूत्तम
॥ एकैकं चालयित्वासौ निःपत्रं कुरुतेंजसा॥ यदि त्वमेकबाणेन विद्ध्वा छिद्रं करोषि चेत्॥ हतस्त्वया तदा वा
ली विश्वासो मे प्रजायते॥ तथेति धनुरादाय सायकं तत्र संदधे॥ बिभेद च तथा रामः सप्त तालान्महाबलः॥ ता
लास्सप्तविनिर्भिद्य गिरिं भूमिं च सायकः॥ पुनरागत्य रामस्य तूणीरे पूर्ववत्स्थितः॥ ततोति हर्षात्सुग्रीवो राम
९४ माहातिविस्मितः॥ देवं जगतां नाथ परमात्मा न संशयः॥ मत्पूर्वकृतपुण्यौघैः संगतोद्य मया सह॥ त्वां भजंति ९४
महात्मानः संसारविनिवृत्तये॥ त्वां प्राप्य मोक्षसचिवं प्रार्थयेहं कथं भवं॥ दाराः पुत्राः धनं राज्यं सर्वं त्वन्मायया
कृतं॥ अतोहं देव देवेश नाकांक्षेन्यत्प्रसीद मे॥ आनंदानुभवं त्वाद्य प्राप्तोहं भाग्यगौरवात्॥ मृदर्थं यतमानेन च नि
धानमिव सत्पते॥ अनाद्यविद्यासंसिद्धं बंधनं छिन्नमद्य नः॥ यज्ञदानतपःकर्मपूर्तेष्टादिभिरप्यसौ॥ न जीर्यते
पुनर्दीर्घं व्रजते संसृतिः प्रभो॥ त्वत्पाददर्शनात्सद्यो नाशमेति न संशयः॥ क्षणार्धमपि यच्चित्तं त्वयि तिष्ठ
त्यचंचलं॥ तस्याज्ञानमनर्थानां मूलं नश्यति तत्क्षणात्॥ तत्तिष्ठतु मनो राम त्वयि नान्यत्र मे सदा॥ रामरामेति य

र्षं गोमतो वालीति दुःखितः॥ गुहाद्वारि शिलामेकां निधाय स्वगृहमागतः॥ ततो बुद्ध्वा मृतो वाली गुहायां रक्षसा
हतः॥ तच्छ्रुत्वा दुःखिताः सर्वे मामनिच्छन्तमप्युत॥ राज्याभिषेचनं चक्रुः सर्वे वानरमंत्रिणः॥ शिष्टं तत्तु मया राज्यं
किंचित्कालमरिंदम॥ ततः समागतो वाली मामाह परुषं रुषा॥ बहुधा भर्त्सयित्वा मां निर्जघान च मुष्टिभिः॥ त
तो निर्गत्य नगरादधावं परयापित्रिया॥ लोकान्सर्वान्परिक्रम्य ऋष्यमूकमुपाश्रितः॥ ऋषेः शापभयात्सोपि नायाति
मं गिरिं प्रभो॥ तदादि मम भार्यां सः स्वयं भुंक्ते विमूढधीः॥ अतो दुःखेन संतप्तो हृतदारो हृताश्रयः॥ वसाम्यद्य
भवत्पादसंस्पर्शात्सुखितोस्म्यहं॥ मित्रदुःखेन संतप्तो रामो राजीवलोचनः॥ हनिष्यामि तव द्वेष्यं शीघ्रं भार्या
पहरिणं॥ इति प्रतिज्ञामकरोत्सुग्रीवस्य पुरस्तदा॥ सुग्रीवोप्याह राजेंद्र वाली बलवतां बली॥ कथं हनिष्यति
भवान्देवैरपि दुरासदं॥ शृणु ते कथयिष्यामि तद्बलं नलिनांबर॥ कदाचित् दुंदुभिर्नाम महाकायो महाबलः॥
किष्किंधामगमद्वाम महामहिषरूपधृक्॥ युयुधे वालिना रात्रौ समाहूयत भीषणः॥ तच्छ्रुत्वा सहमानोसौ वालीप
रमकोपनः॥ महिषं शृंगयोर्धृत्वा पातयामास भूतले॥ पादेनैकेन तत्कायं आक्रम्यास्य शिरो महत्॥ हस्ताभ्यां भ्रा
मयन्नुच्छिंदन्तोन्नयित्वाक्षिपद्भुवि॥ पपात तच्छिरो राम मातंगाश्रमसंनिधौ॥ योजनात्पतितं तस्मात्मुनेराश्रममं
डलं॥ रक्तवृष्टिः पपातोच्चैर्दृष्ट्वा तां क्रोधमूर्छितः॥ मतंगो वालिनं प्राह यद्यागंतास्मिन् गिरिं॥ इतः परं जगन्नशि
रा मरिष्यति न संशयः॥ एवं शापस्तदारभ्य ऋष्यमूकं न याति असौ॥ एतज्ज्ञात्वाहमप्यत्र वसामि निर्भयं वालितः॥ राम

सौधमारोढमीश्वर॥ नमः सीतापते राम नमः कारुणिकोत्तम॥ रावणारे नमस्तेस्तु त्राहिमां न वसागरात्॥
ततः प्रसन्नं प्रोवाच श्रीरामो भक्तवत्सलः॥ वरं वृणीष्व भद्रं ते वांछितं वरदोस्म्यहं॥ विभीषण उवाच॥ ध
न्योस्मि कृतकृत्योस्मि कृतकार्योस्मि राघव॥ त्वत्पाददर्शनादेव विमुक्तोस्मि न संशयः॥ नास्ति मत्स
दृशो धन्यो नास्ति मत्सदृशः शुचिः॥ नास्ति मत्सदृशो लोके राम त्वन्मूर्त्तिदर्शनात्॥ कर्मबंधविनाशाय
त्वन्नाम निकलक्षणं॥ त्वद्ध्यानं परमार्थं च वेद्मि रघुनंदन॥ नयाचे राम राजेंद्र सुखं विषयसंभवं॥ त्व
त्पादकमलेसक्ता भक्तिरेव सदास्तु मे॥ ओमित्युक्त्वा पुनः प्रीतो रामः प्रोवाच राक्षसं॥ शृणु वक्ष्यामि ते वत्स
रहस्यं मम निश्चितं॥ मद्भक्तानां प्रशांतानां योगिनां वीतरागिणां॥ हृदये सीतया नित्यं वसाम्यत्र न संशयः॥
८० तस्मात्त्वं सर्वदा शांतः सर्वकल्मषवर्जितः॥ मां ध्यात्वा मोक्ष्यसे नित्यं घोरसंसारसागरात्॥ स्तोत्रमेतत्प
91 ठेद्यस्तु लिखेद्यः शृणुयादपि॥ मत्प्रीतये मम नीष्टेमम सारूप्यमाप्नुयात्॥ इत्युक्त्वा लक्ष्मणं प्राह श्रीरामो ८०
भक्तवत्सलः॥ पश्य त्वं विदानीमे वैषमम संदर्शने फलं॥ लंकाराज्येभिषेक्ष्यामि जलमानय सागरात्॥
यावच्चंद्र[illegible]श्च सूर्यश्च यावत्तिष्ठति मेदिनी॥ यावत्तम कथा लोके तावद्राज्यं करोत्यसौ॥ इत्यु
क्त्वा लक्ष्मणेनांबु स्वाप्य कलशेनानतं॥ लंकाराज्याधिपत्यार्थमभिषेकं रमापतिः॥ कारयामास सचि

न१

तांजलिपुटो भूत्वास्तोतुं समुपचक्रमे ॥ विभीषण उवाच ॥ नमस्ते राम राजेंद्र नमः सीतामनोरम ॥ नमस्ते चं
डकोदंड नमस्ते भक्तवत्सल ॥ नमोनंताय रामाय शांतायामिततेजसे ॥ सुग्रीवमित्राय च ते रघूणां पतये न
मः ॥ जगदुत्पत्तिनाशानां कारणाय महात्मने ॥ त्रैलोक्यगुरवे नादिगृहस्थाय नमो नमः ॥ त्वमादिर्जगतां राम त्वमे
व स्थितिकारणं ॥ त्वमंते निधनं स्थानं स्वेच्छाचारस्त्वमेव हि ॥ चराचराणां भूतानां बहिरंतश्च राघव ॥ व्याप्यव्याप
करूपेण भवान्भाति जगन्मयः ॥ त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः ॥ गतागतं प्रपद्यंते पापपुण्यवशा
त्सदा ॥ तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ॥ यावन्न ज्ञायते ज्ञानं चेतसानन्यगामिना ॥ त्वदज्ञानात्सदा स
क्ताः पुत्रदारगृहादिषु ॥ रमंते विषयान्सर्वानंते दुःखप्रदान्विभो ॥ त्वमिंद्रोग्निर्यमो रक्षो वरुणश्च तथानिलः ॥
कुबेरश्च तथा रुद्रस्त्वमेव पुरुषोत्तमः ॥ त्वमणोरप्यणीयांश्च स्थूलात्स्थूलतरः प्रभो ॥ त्वं पिता सर्वलोकानां
माता धाता त्वमेव हि ॥ आदिमध्यांतरहितः परिपूर्णोच्युतोव्ययः ॥ त्वं पाणिपादरहितश्चक्षुःश्रोत्रविवर्जि
तः ॥ श्रोता द्रष्टा गृहीता च जवनस्त्वं खरांतक ॥ कोशेभ्यो व्यतिरिक्तस्त्वं निर्गुणो निरुपाश्रयः ॥ निर्विकल्पो नि
विकारो निराकारो निरीश्वरः ॥ षड्भावरहितोनादिः पुरुषः प्रकृतेः परः ॥ मायया गृह्यमाणस्त्वं मनुष्य इव भाव्यसे ॥
ज्ञात्वा त्वां निर्गुणमजं वैष्णवा मोक्षगामिनः ॥ अहं त्वत्पादसद्भक्तिनिःश्रेणीं प्राप्य राघव ॥ इच्छामि ज्ञानयोगाख्य

द्वयोः सेवन्निकांक्षीपरिपूर्णमानसाः॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरयुद्धकांडेद्वितीय
सर्गः॥ विभीषणोमहाभागश्चतुर्भिः मंत्रिभिः सह॥ आगत्यगगने रामंसंमुखेसमवस्थितः॥ उच्चैरु
वाचभोस्वामिन्रामराजीवलोचन॥ रावणस्यानुजोहंतेदारहर्तुर्विभीषणः॥ नाम्नाभ्रात्रानिरस्तोहं
हंतुंमांखड्गमादायप्रादवद्राक्षसाधमः॥ त्वामेवशरणंगतः॥ हितमुक्तंमयादेवतस्यैवाविदितात्मनः॥ सीतारामायवैदेहींप्रेषयेतिपुनःपु
तेनविरोक्तसचिवैश्चतुर्भिः सहितोगतः॥ नः॥ उक्तोपिनशृणोत्येषकालपाशवशंगतः॥ विभीषणवचःश्रुत्वासुग्रीवोवाक्यमब्रवीत्॥ विश्वा
त्वामेवभवमोक्षायमुमुक्षुःशरणंगतः सार्हो नतेराममायावीराक्षसाधमः॥ सीताहर्तुर्विशेषेणरावणस्यानुजोभवत्॥ मंत्रिभिःसायुधैरस्मा
न्विवरेनिहनिष्यति॥ तदाज्ञापयमेदेववानरैर्हन्यतामयं॥ ममैवंभातितेरामबुद्ध्याकिंनिश्चितंवद॥
९६ श्रुत्वासुग्रीववचनंरामःसस्मितमब्रवीत्॥ यदीच्छामिकपिश्रेष्ठलोकान्सर्वान्सहेश्वरान्॥ निमिषा ९६
र्द्धेनसंहन्यांसृजामिचनिमेषतः॥ अतोमयाभयंदत्तंशीघ्रमानयराक्षसं॥ सकृदेवप्रपन्नायतवास्मी
तिचयाचते॥ अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम॥ रामस्यवचनंश्रुत्वासुग्रीवोहृष्टमानसः॥ विभी
96
षणमथानीयदर्शयामासराघवं॥ विभीषणस्तुसाष्टांगंप्रणिपत्यरघूत्तमं॥ हर्षगद्गदयावाचाभक्त्याच
परयान्वितः॥ रामंश्यामंविशालाक्षंप्रसन्नमुखपंकजं॥ धनुर्वाणधरंशांतंलक्ष्मणेनसमन्वितं॥ कृ

हन्मितस्मिन्क्षणेनैवधिक्त्वांरक्षःकुलाधम॥रावणेनैवमुक्तःसन्नुपत्यसविभीषणः॥उत्पपातसनामग्र
द्रदापाणिर्महाबलः॥चतुर्भिर्मंत्रिभिःसार्द्धंगगनस्थोब्रवीद्वचः॥क्रोधेनमहताविष्टोराक्षसंदशकंधरं
माविनाशमुपैहीतिप्रियवादिनमेवमां॥धिक्करोषितपापित्वंज्येष्ठोभ्रातापितुःसमः॥कालोराघवरूपेण
जातोदशरथान्वये॥कालीसीताभिधानेनजाताजनकमंदिरे॥तावुभावागतावत्रभूमेर्भारापनुत्तये॥तेनैवप्रे
रितस्त्वंतुनशृणोषिहितंमम॥श्रीरामःप्रकृतेःसाक्षात्परस्मात्सर्वदास्थितः॥बहिरंतश्चभूतानांसमःसर्वत्रसं
स्थितः॥नामरूपादिभेदेनतत्तन्मयइवामलः॥यथानानाप्रकारेषुवृक्षेष्वेकोमहानलः॥तत्तदाकृतिभेदेन
भिद्यतेज्ञानचक्षुषां॥पंचकोशादिभेदेनतत्तद्रूपइवाबुधैः॥नीलपीतादियोगेननिर्मलस्फटिकोयथा॥स्वा
वनित्यमुक्तोपिस्वमायागुणबिंबितः॥कालःप्रधानंपुरुषोव्यक्तंचेतिचतुर्विधः॥प्रधानरूपाभ्यांसजगत्कृत्स्नं
सृजत्यजः॥कालरूपेणकलनांजगतःकुरुतेव्ययः॥कालरूपीसभगवान्रामरूपेणमायया॥ब्रह्मणाप्रार्थि
देवस्त्वद्वधार्थमिहागतः॥तदन्यथा(या)कथंकुर्यात्सत्यसंकल्परघूत्तमः॥निहनिष्यतित्वांरामःसपुत्रबलवाहनं
॥हन्यमानंनशक्तोस्मिद्रष्टुंरामेणरावण॥त्वांराक्षसकुलंहत्वाततोगाक्षामिराघवं॥मयिजातेसुखीभूत्वा
रमस्वभुवनेऽचिरं॥विभीषणोरावणवाक्यतःक्षणाद्विसृज्यसर्वंसपरिच्छदंगृहं॥जगामरामस्यपदारविं

५५

तोनामवतप्रधानो विभीषणस्मद्भिमतां वरिष्टः श्रीरामपादद्वयएकतानः ॥ श्रुतम्पदेवारिमुपोपविष्टः ॥ विलो
क्य कुंभकर्णादिदैत्यानुन्मत्तप्रमत्तानतिविस्मयेन ॥ विलोक्य कामातुरमप्रमत्तो दशाननं प्राह विशुद्धबुद्धिः
॥ नकुंभकर्णो नद्रजितो नचरा नतेनूनं [illegible] षाम हापार्श्वमहोदरौ तौ ॥ निकुंभकुंभौ च तथातिकायः स्थातुं न श
क्ता युधि राघवस्य ॥ सीतानिधानेन महागनेदेणग्रस्तोसि राजन्न च वेत्ति विमोहः ॥ तामेव सत्कृत्य महाधने
न दत्वाभिरामाय सुखी न वत्वं ॥ यावन्न रामस्य शिता शिलीमुखाः लंकां [illegible] निव्याप्य शिरांसि रक्षसां ॥ हितं द
ति तावद्रघुनायकस्य नीतां जानकीं त्वं प्रतिदातुमर्हसि ॥ यावन्न शाखामृगाः कपयो महाबला हरिद्रतुल्या न
खदंष्ट्रयोधिनः ॥ लंकां समाक्रम्य विनाशयंति ते तावदद्रुतं देहि रघूत्तमाय तां ॥ जीवन्न रामेण विमोक्षसे त्वं
गुप्तः सुरैर्ब्रह्मरपि शंकरेण ॥ न देवराजांकगतो न मृत्योः पाताललोकानपि संप्रविष्टः ॥ श्रुत्वेति तं पथ्यं च वचो वि
भीषणस्य वचः खलः ॥ प्रतिजग्राह नैवासौ म्रियमाण इवौषधं ॥ कालेन नोदितो दैत्यो विभीषणमथाब्रवीत् ॥
॥ रावण उवाच ॥ सृणंतु राक्षसाः सर्वे मदं धोवाक्यमीदृशं ॥ महत्तेजोभिः पुष्टांगो मत्समीपे वसन्नपि ॥ प्रती
पमाचरत्येष मम नैवाहितकारकः ॥ मित्रभावेन शत्रुर्मे जातो नास्त्यत्र संशयः ॥ अनार्येण कृतं चेन संग
तिर्मे न युज्यते ॥ विनाशमभिकांक्षंति ज्ञातीनां ज्ञातयः सदा ॥ योन्यस्त्वेवं विधं ब्रूयात् वाक्यमेतन्निशाचरैः

95

रा
क्षसास्तमथाब्रुवन् ॥ देवशंका कुतो राम। तत्त्रैलोक्यजितारणे ॥ इंद्रस्तु वध्वा निद्धिप्तः पुत्रेण तव पत्त
नेन ॥ जित्वा कुवेरमानीषपुष्पकं भुज्यते त्वया ॥ यमो जितः कालदंडाद्भयं नाभूत्तव प्रभो ॥ वरुणोदुंकृते नै
वर्जिताः सर्वेपि राक्षसाः ॥ म[illegible] महासुरो भीत्या कंन्यां दत्वा स्वयं तव ॥ त्वद्वशो वर्त्तते द्यापि किमुतान्ये म
हासुराः ॥ हनुमद्धर्षणं यत्तु तदवज्ञाकृतं च नः ॥ वानरोयं किमस्माकं अस्मिन् पौरुषदर्शने ॥ इत्युपेक्षि
तमस्माभिर्द्धर्षणं तेन किं भवेत् ॥ वयं प्रमत्ताः किं तेन वंचितास्मो हनूमता ॥ यानीमो यदि तत्सर्वं कथं जी
वन् गमिष्यति ॥ आज्ञापय जराकृत्स्नं वद्धं वानरमानुषं ॥ कृत्वा यास्यामहे सर्वे पुत्येकं वा नियोजय ॥ कुं
श्री भकर्णस्तदा प्राह रावणं राक्षसेश्वरं ॥ आरब्धं यत्त्वया कर्म स्वात्मनाशाय केवलं ॥ दृष्टोसि तदा नागयात्
स्त्वं रामेण महात्मना ॥ यदि पश्यति रामस्त्वां जीवन्नायासि रावण ॥ रामो न मानुषो देवः साक्षान्नाराय
णो व्ययः ॥ सती भगवती लक्ष्मी रामपत्नी यशस्विनी ॥ राक्षसानां विनाशाय त्वयानीता सुमध्यमा ॥ विष
पिंडमिवागीर्य महामीनो यथा त्वया ॥ आनीता जानकी पश्चात् त्वया किं वा न विष्यति ॥ यद्यप्यनुचितं क
र्म त्वया कृतमजानता ॥ सर्वं समं करिष्यामि स्वस्थचित्तो भव प्रभो ॥ कुंभकर्णवचः श्रुत्वा वाक्यमिंद्रजि
द्ब्रवीत् ॥ देहि देव ममानुज्ञां हत्वा रामं सलक्ष्मणं ॥ सुग्रीवं वानरांश्चैव पुनरायास्यते क्षणात् ॥ तवा..

हृष्टं ब्रवीमि ते ॥ लंका दिव्यपुरी देव त्रिकूटशिखरे स्थिता ॥ स्वर्णप्राकारसहिता स्वर्णाट्टालकसंयुता ॥ परिख
भिः परिवृत्ता पूर्णा निर्मलोदकैः ॥ नानोपवनशोभाढ्या दिव्यवापीनिरावृता ॥ गृहैर्विविचित्रैश्च नाट्यैर्म
णिमत्तैर्मयैश्च ते ॥ पश्चिमद्वारमासाद्य गजवाहाः सहस्रशः ॥ उत्तरे द्वारि तिष्ठंति सश्ववाहाः सपत्तयः ॥
तिष्ठंत्यर्बुदसंख्याकाः प्राच्यामपि तथैव च ॥ रथिनो राक्षसा वीरा द्वारं दक्षिणमास्थिताः ॥ मध्यकक्ष्ये
ष्वसंख्याता गजाश्वरथपत्तयः ॥ रक्षंति सदा लंकां नानास्त्रकुशला प्रभो ॥ संक्रमैर्विविधैर्लंका शतघ्नी
भिश्च संयुता ॥ एवं स्थितापि देवेश शृणु मे तत्र चेष्टितं ॥ दशाननबलौघस्य चतुर्थांशो मया हतः ॥ दग्ध्वा लंका
पुरीं स्वर्णप्रकारा धर्षिता मया ॥ शतघ्न्यः संक्रमाश्चैव नाशिता मे रघूत्तम ॥ देव त्वद्दर्शनादेव लंका भस्मीकृ
उ॰का ता भवेत् ॥ प्रस्थानं कुरु देवेश गच्छामो लवणांबुधेः ॥ तीरं सहमहावीरैर्वानरौघैः समंततः ॥ श्रुत्वा हनुमतो
वाक्यं उवाच रघुनंदनः ॥ सुग्रीव सैनिकान् सर्वान् प्रस्थानाय प्रचोदय ॥ इदानीमेव विजयो मुहूर्तः परिवर्तते ॥ अ उ॰का
४३ स्मिन् मुहूर्ते गत्वाहं लंकां राक्षससंकुलां ॥ सप्राकारां सुदुर्धर्षां नाशयिष्ये सरावणां ॥ आनेष्यामि चैम दक्षिणा सीता
क्षि स्फुरत्यदः ॥ प्रयातु वाहिनी सर्वा वानराणां तरस्विनां ॥ रक्षंतु यूथपाः सेनामग्रे पृष्ठे च पार्श्वयोः ॥ हनुमं
तमथारुह्य गच्छाम्यग्रे रघुनंदनः ॥ आरुह्य लक्ष्मणो यातु सुग्रीव त्वं मया सह ॥ गजो गवाक्षो गवयो मैंदो

कार्यं कृतं हनुमता देवैरपि सुदुष्करं ॥ मनसापि यदन्येन कर्तुं शक्यं न भूतले ॥ शतयोजनविस्तीर्णमुल्लंघयेत्क
पयोनिधिं ॥ लंकां च राक्षसैर्गुप्तां को वा धर्षयितुं क्षमः ॥ भृत्यकार्यं हनूमता कृतं सर्वमशेषतः ॥ सुग्रीवसदृशो
न्तो केन भूतो न भविष्यति ॥ अहं च रघुवंशश्च लक्ष्मणश्च कपीश्वरः ॥ जानक्या दर्शनेनाद्य रक्षिताः स्मो हनूम
मता ॥ सर्वथा सुकृतं कार्यं जानक्याः परिमार्गणं ॥ समुद्रं नमास्यता सीदतीव मनो मम ॥ कथं नक्रझषाकी
र्णं समुद्रं [illegible] शतयोजनं ॥ लंघयित्वा रिपुं हन्यां कथं द्रक्ष्यामि जानकीं ॥ श्रुत्वा तु रामवचनं सु
ग्रीवः प्राह राघवं ॥ समुद्रं लंघयिष्यामो महानक्रझषाकुलं ॥ लंकां च विधिपि[illegible]निष्यामो [illegible] बाणं ॥
विंतां त्यज रघुश्रेष्ठ चिंता कार्यविनाशनी ॥ एतान्पश्य महासत्वान्शूरान्वानरपुंगवान् ॥ त्वत्प्रियार्थं समुद्युक्ता
न्प्रवेष्टुमपि पावकं ॥ समुद्रतरणे बुद्धिं कुरुष्व पुरुषर्षभं ततः ॥ दृष्ट्वा लंकां दशग्रीवं हत इत्येव मन्महे ॥ नहि पश्य
म्यहं किंचित्त्रिषु लोकेषु राघव ॥ गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ सर्वथा नो जयो राम न विद्यति न संशयः
॥ निमित्तानि च पश्यामि तथा भूतानि सर्वशः ॥ सुग्रीवं वचनं श्रुत्वा नीतिवीर्यसमन्वितं ॥ अंगीकृत्वाब्रवीद्रा
मो हनुमंतं पुरःस्थितं ॥ येन केन प्रकारेण लंघयामो महार्णवं ॥ लंकास्वरूपं मे ब्रूहि दुःसाध्यं देवदानवैः ॥ ज्ञा
त्वा तस्य प्रतीकारं करिष्यामि कपीश्वर ॥ श्रुत्वा रामस्य वचनं हनूमान्विनयान्वितः ॥ उवाच प्रांजलिर्देव यथा

तमा॥ क्रोशंतीराम रामेति दृष्ट्वा हा सीतेति मुहुर्मुहुः स्मान्यवर्ततोपरि॥ विमुच्याभरणान्याशु स्वोत्तरीयेण भामिनी
री ॥निरीक्ष्याथः परित्यज्य क्रोशंतीतेन रक्षसा॥ नीतासं नूपुराण्याशु गुहायामक्षिपं पुत्रो॥ इदानीमपि पश्यत्वं
जानीहि तिवानवा॥ इत्युक्त्वानीय रामाय दर्शयामास वानरः॥ विमुच्य रामस्तत् दृष्ट्वा हा सीतेति मुहुर्मु
हुः॥ हृदि निःक्षिप्य तत्सर्वं[illegible]रोद प्राकृतो यथा॥ आश्वास्य राघवं भ्राताल्लक्ष्मणो वाक्यमब्रवीत्॥ अचिरेणैः
२७ वतः राम प्राप्यते जानकी[illegible]त्र॥ वानरेंद्र सहायेन हत्वा रावणमाहवे॥ सुग्रीवोप्याह हे राम प्रतिज्ञां करवा
णि ते॥ समरे रावणं हत्वा[illegible] तव दास्यामि जानकीं॥ ततो हनुमान् प्रज्वाल्य तयोरग्निं समीपतः॥ तौउ
६२ भौ राम सुग्रीवौ अग्नौ साक्षिणि तिष्ठति॥ बाहू प्रसार्य चालिंग्य परस्परमकल्मषौ॥ समीपे रघुनाथस्य
सुग्रीवः समुपाविशत्॥ रुदंतं कथयामास प्रणयाद्रघुनायके॥ सखे शृणु ममोदंतं वालिना यत्कृतं ६२
पुरा॥ मयपुत्रोथ मायावी नाम्ना परम दुर्मदः॥ किष्किंधां समुपागत्य वालिनं समुपाह्वयन्॥ सिंहनादेन महता
वाली तु तदमर्षणः॥ निर्ययौ क्रोधताम्राक्षो जघान दृढमुष्टिना॥ दुद्राव तेन संविग्नो जगाम स्वगृहां प्रति॥ अनुदु
द्रावतं वाली मायाविनमहं तथा॥ ततः प्रविष्टमालोक्य गुहां मायाविनं रुषा॥ वाली मामाह तिष्ठ त्वं बहिर्गुहा
म्यहं गुहां॥ इत्युक्त्वाविशत् स गुहां मासमेकं न निर्ययौ॥ मासादूर्ध्वं गुहाद्वारान्निर्गतं रुधिरं बहु॥ तं दृष्ट्वा परित

तेननिष्कासितोभार्याहृतातस्यैववालिना॥तद्भयादृष्यमूकाख्यंगिरिमाश्रित्यसंस्थितः॥अहंसुग्रीवसचिवोवा
युपुत्रोमहामते॥हनुमान्नामविख्यातोह्यंजनीगर्भसंभवः॥तेनसख्यंत्वयायुक्तंसुग्रीवेणरघूत्तम॥भार्या
पहारिणंहंतुंसहायस्तेभविष्यति॥इदानीमेवगच्छामआगच्छयदिरोचते॥ उवाचरामः॥अहमप्यागतस्तेनस
ख्यं[illegible]पीश्वर॥सखायुक्तस्यापियत्कार्यंतत्करिष्याम्यसंशयं॥हनुमान्स्वस्वरूपेणस्थितोराममथाब्रवीत्॥आ
रोहतांममस्कंधौगच्छामःपर्वतोपरि॥यत्रतिष्ठतिसुग्रीवोमंत्रिभिर्वालिनोभयात्॥तथेतितस्यारुरोहस्कंधे
रामःसलक्ष्मणः॥उत्पपातगिरेर्मूर्ध्निक्षणेनैवमहाकपिः॥वृक्षच्छायांसमाश्रित्यसंस्थितौरामलक्ष्मणौ॥हनुमा
नपिसुग्रीवमुपगम्यकृतांजलिः॥व्येतुतेभयमायातौराजन्श्रीरामलक्ष्मणौ॥शीघ्रमुत्तिष्ठरामेणसख्यंतेयोजि
ग्नि तंमया॥अग्निंसाक्षिणमारोप्यतेनसख्यंद्रुतंकुरु॥ततोतिहर्षात्सुग्रीवःसमागम्यरघूत्तमं॥वृक्षशाखांस्वयंछि
त्वाविष्टरंप्रददौमुदा॥हनुमान्लक्ष्मणस्यापादात्सुग्रीवायचलक्ष्मणः॥हर्षेणमहताविष्टाःसर्वएवावतस्थिरे॥
लक्ष्मणस्त्वब्रवीत्सर्वंरामवृत्तांतमादितः॥वनवासाभिगमनंसीताहरणमेवच॥लक्ष्मणेनोक्तंवचःश्रुत्वासुग्री
वोराममथाब्रवीत्॥अहंकरिष्येराजेंद्रसीतायाःपरिमार्गणं॥साहाय्यमपितेरामकरिष्येशत्रुघातिनः॥शृणुराम
ते यादृष्टंकिंचिद्वक्ष्याम्यहं॥एकदामंत्रिभिःसार्धंस्थितोहंगिरिमूर्धनि॥विहायसानीयमानाकेनचित्प्रमदा

३

सुविक्रमौ॥सुग्रीवस्तु गिरेर्मूर्ध्नि चतुर्भिः सहवानरैः॥स्थित्वा ददर्श तौ यांतौ आरुरोह गिरेः शिरः॥भयादाह हनूमं
तं कौ तौ वीरवरौ सखे॥गच्छ जानीहि भद्रं ते वटुर्भूत्वा द्विजाकृतिः॥वालिना प्रेषितौ किं वा मां हंतुं समुपागतौ॥ताभ्यां
संभाषणं कृत्वा जानीहि हृदयं तयोः॥यदि तौ दुष्टहृदयौ संज्ञां कुरु कराग्रतः॥साधु त्वं स्मितवक्त्रेण भूरवं जानीहि
९२ निश्चियं॥तथेति वटुरूपेण हनुमान्समुपागतः॥विनयावनतो भूत्वा रामं नत्वेदमब्रवीत्॥कौ युवां पुरुषव्याघ्रौ यु
वानौ वीरसंमतौ॥द्योतयंतौ दिशः सर्वाः प्रभया भास्कराविव॥युवां त्रैलोक्यकर्तारौ इति भाति मनो मम॥युवां प्रधान
पुरुषौ जगद्धेतू जगन्मयौ॥मायामानुषाकारौ चरंताविव लीलया॥भूभारहरणार्थाय भक्तानां पालनाय च॥अवतीर्णा
६२ विह परौ चरंतौ क्षत्रियाकृती॥जगत्स्थितिलयौ सर्गं लीलया कर्तुमुद्यतौ॥स्वतंत्रौ प्रेरकौ सर्वहृदयस्थाविहेश्वरौ॥नर
नारायणौ लोके चरंताविति मे मतिः॥श्रीरामो लक्ष्मणं प्राह पश्यैनं वटुरूपिणं॥शब्दशास्त्रमशेषेण श्रुतं नूनमनेकधा ६२
॥अनेन भाषितं कृत्स्नं न किंचिदपशब्दितं॥ततः प्राह हनूमंतं राघवो ज्ञानविग्रहः॥अहं दाशरथी रामस्त्व
यं मे लक्ष्मणोनुजः॥सीतया भार्यया सार्द्धं पितुर्वचनगौरवात्॥आगतस्तत्र विपिने तो दंडके द्विज॥तत्र भा स्थि
र्या हृता सीता रक्षसा केनचिन्मम॥तामन्वेष्टुमिहायातौ त्वं को वा कस्य वा वद॥ वटुरुवाच॥ सुग्रीवो नाम राजा
स्तु वानराणां महामतिः॥चतुर्भिः मंत्रिभिः सार्द्धं गिरिमूर्द्धनि तिष्ठति॥भ्राता कनीयान्सुग्रीवो वालिनः पापचेतसः॥

गेरघुनंदन॥ मुहूर्तं तिष्ठ राजेंद्र यावद्दग्धं कलेवरं॥ यास्यामि वचनं राम तव विष्णोः परं पदं॥ इति रामं समामंत्र्य
विवेश हुताशनं॥ क्षणं निर्धूय सकलमविद्याकृतबंधनं॥ रामप्रसादाच्छबरी मोक्षं प्रापातिदुर्लभं॥ किं दुष्करं जग
न्नाथे श्रीरामे भक्तवत्सले॥ प्रसन्ने धमजन्मापि शबरी मुक्तिमापसा॥ किं पुनर्ब्राह्मणामुख्याः पुण्याः श्रीरामचिं
तकाः॥ मुक्तिं यांतीति तद्भक्तिर्मुक्तिरेव न संशयः॥ भक्तिर्मुक्तिविधायिनी भगवतः श्रीरामचंद्रस्य हे लोकाः कामदुघां
घ्रिपद्मयुगलं सेवध्वमत्युत्सुकाः॥ नानाज्ञानविशेषमंत्रविततं त्यक्त्वासुदूरे भृशं॥ रामं श्यामतनुं स्मरारिहृदये
भांतं भजध्वं बुधाः॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे दशमोध्यायः॥ कांडे समारण्ये
सर्गाध्यात्माख्ये द्विपंचशतानि श्लोकाः पापहराः पार्वती शोक्ताः॥ इत्यारण्यकांडं समाप्तं॥ अतः परं किष्किंधाकांडः
॥ ततः स लक्ष्मणो रामः शनैः पंपासरस्तटं॥ आगत्य सरसां श्रेष्ठं दृष्ट्वा विस्मयमाययौ॥ क्रोशमात्रं सुविस्तीर्ण
मगाधममलं वरं॥ उत्फुल्लांबुजकल्हारकुमुदोत्पलमंडितं॥ हंसकारंडवाकीर्णं चक्रवाकादिशोभितं॥ जलकुक्कु
टकोयष्टिक्रौंचनादोपनादितं॥ नानापुष्पलताकीर्णं नानाफलवनावृतं॥ सतां मनः स्वच्छजलं पद्मकिंजल्कवा-
सितं॥ तत्रोपस्पृश्य सलिलं पीत्वा श्रमहरं विभुः॥ सानुजः सरसस्तीरे शीतले नपथ्याययौ॥ ऋष्यमूकगिरेः पार्श्वे
गच्छंतौ रामलक्ष्मणौ॥ धनुर्बाणकरौ दांतौ जटावल्कलमंडितौ॥ पश्यंतौ विविधान्वृक्षान्गिरेः शोभां

कपीश्वरः॥ गत्वा तमब्रवी[illegible]देवं चिरकालाभिरक्षितं॥ नष्टं मधुवनं तेद्य कुमारेण हनूमता॥ श्रुत्वा दधिमुखेनो
क्तं सुग्रीवो हृष्टमानसः॥ हृष्ट्वागतो न संदेहः सीता पवननंदन॥ न चेन्मधुवनं द्रष्टुं समर्थः कोन्नवेन्म॥ तत्रापि
वायुपुत्रेण कृते कार्ये न संशयः॥ श्रुत्वा सुग्रीववचनं हृष्टो रामस्तमब्रवीत्॥ किमुच्यते त्वया राजन्वः सीता
कृपान्विता॥ कोवा स्य प्रमातः[illegible]स्तस्मात्स्थाना[illegible]त्सर्वं स्तुवत्॥ सुग्रीव[illegible]स्त्वब्रवीद्वाक्यं देव दृष्टावनीसुता
(९) ॥ हनुमत्प्रमुखाः सर्वे प्रविश्य मधुकाननं॥ नंदयंती स्म सकलं ताडयंति स्म रक्षिणः॥ अहत्वा देवकार्यं ते द्र
ष्टुं मधुवनं मम॥ न समर्थास्ततो देवी दृष्टा सीतेति निश्चितं॥ रक्षिणो वोनयं मास्त्रगत्वा वृत्तममा[illegible]या॥ वानरान्
गदमुखान्नानयध्वं ममांतिकं॥ श्रुत्वा सुग्रीववचनं गत्वा ते वायुवेगतः॥ हनूमत्प्रमुखान्नूचुर्गच्छतेश्वरशास
५१ नात्॥ द्रष्टुमिच्छति सुग्रीवः सरामो लक्ष्मणान्वितः॥ युष्मानतीव हृष्टात्मा त्वरिखंति वदावत्ताः॥ तथेत्यंबरमास ५८
दाय पुत्रवानरोत्तमः॥ [illegible] मंतं पुरस्कृत्य युवराजं तथांगदं॥ रामसुग्रीवयोरग्रे निपेतुर्भुवि सत्वरं॥ साष्टांगं प्र
णिपत्याग्रे रामं पश्चाद्धरीश्वरं॥ हनुमान्राघवं प्राह दृष्टा सीता निरामया॥ कुशलं प्राह राजेंद्र जानकी त्वां सुचा
न्विता॥ अशोकवनिकामध्ये शिंशुपामूलमाश्रिता॥ राक्षसीभिः परिवृता निराहारा कृशाप्रभो॥ हा राम रामरा
मेति शोचंती मलिनांबरा॥ एकवेणी मया दृष्टा शोकेनैराभ्यासिता प्रभो॥ रक्षसाम्भ्रातरे स्थित्वा सूक्ष्मरूपेण तत्र

घोवानरपंजरैः॥ आगत्य वानरैः सार्द्धं हत्वा रावणमाहवे॥ मां नयेद्यदि रामस्य कीर्त्तिर्निवर्तति शाश्वती॥ अतो गच्छ कथं वा
पि प्राणान्संधारयाम्यहं॥ इति प्रस्थापितो वीरः सीतया प्रणपत्य तां॥ जगाम पर्वतस्याग्रे गंतुं पारं महोदधेः॥ तत्र गत्वा म
नि० २ हासत्वः पादाभ्यां पीडयन्गिरिं॥ जगाम वायुवेगेन पर्वतश्च महीतलं॥ गतो महीसमानत्वं त्रिंशद्योजनमुच्छ्रितं॥ मारुतिर्गि
गनांतस्थो महाशब्दं चकार सः॥ तच्छ्रुत्वा वानराः सर्वे ज्ञात्वा मारुतिमागतं॥ हर्षेण महताविष्टाः शब्दं चक्रुर्महास्वनं॥ शब्दे ह० ४
नैव विजानीमः कृतकार्यः समागतः॥ हनूमानेष पश्यध्वं वानरा वानरर्षभाः॥ एवं ब्रुवत्सु वीरेषु वानरेषु स मारुतिः॥ अ
वतीर्य गिरेर्मूर्ध्नि वानरानिदमब्रवीत्॥ दृष्टा सीता मया लंका धर्षिता च सकानना॥ संभाषितो दशग्रीवस्ततोऽहं पुनरागतः
॥ इदानीमेव गच्छामो रामसुग्रीवसंनिधिं॥ इत्युक्ता वानराः सर्वे हर्षेणालिंग्य मारुतिं॥ केचित्तु चुंबुर्लांगूलं ननृतुः केचिदु
त्सुकाः॥ हनूमता समेतास्ते जग्मुः प्रस्रवणं गिरिं॥ गच्छंतो ददृशुर्वीरा वनं सुग्रीवरक्षितं॥ मधुसंज्ञं तदा प्राप्य अंगदं वान
रर्षभाः॥ क्षुधिताः स्मो वयं वीर देह्यनुज्ञां महामते॥ भक्षयामः फलान्यद्य पिबामोऽमृतवन्मधु॥ संतुष्टो राघवेंद्रस्तु गच्छामो
देवसानुजं॥ अंगद उवाच॥ हनूमान्कृतकार्योऽयं पिबंतु तत्प्रसादतः॥ भक्षध्वं फलमूलानि त्वरितं हरिसत्तमाः॥ ततः
प्रविश्य हरयः पातुमारेभिरे मधु॥ रक्षिणस्तान्नात्य दधिवक्त्रेण चोदिताः॥ पिबतस्ताडयामासुर्वानरान्वानरर्षभाः॥
ततस्ते मुष्टिभिः पादैश्चूर्णयित्वा पपुर्मधु॥ ततो दधिमुखः क्रुद्धः सुग्रीवस्य स मातुलः॥ जगाम रक्षिभिः सार्द्धं यत्र राजा

भवेत्॥आचार्योपासनंभद्रेमद्बुद्ध्यामायया सदा॥पंचमंपुण्यशीलत्वंयमादिनियमादिच॥निष्ठामत्पूजनेनित्यं
षष्टंसाधनमीरितं॥मत्मंत्रोपासकत्वंचसांगंसप्तममुच्यते॥मद्भक्तेष्वधिकापूजासर्वभूतेषुमन्मतिः॥बाह्यार्थे
षुविरागत्वंशमादिसहितंतथा॥अष्टमंनवमंतत्वंविचारंममभामिनि॥एवंनवविधंभक्तिसाधनंयस्यवा
भवेत्॥स्त्रियोवापुरुषस्यापितिर्यग्योनिगतस्यवा॥भक्तिःसंजायतेप्रेमलक्षणाशुभलक्षणे॥भक्तौसंजातमा
त्रायांमत्तत्वानुभवस्तदा॥ममानुभवसिद्धस्यमुक्तिस्तत्रैवजन्मनि॥स्यात्तस्मात्कारणंभक्तिर्मोक्षस्येतिसुनिश्चि
तं॥प्रथमंसाधनंयस्यभवेत्तस्यक्रमेणतु॥भवेत्सर्वंततोभक्तिर्मुक्तिरेवेतिनिश्चितं॥तस्मान्मद्भक्तियुक्तात्वंततो
हंत्वामुपस्थितः॥इतोमद्दर्शनान्मुक्तिस्तवनान्यत्रकारणं॥यदिजानासिमेब्रूहिसीताकमललोचना॥कुत्रा
स्तेकेनवानीताप्रियामेप्रियदर्शना॥ शबर्युवाच॥ देवजानासिसर्वज्ञसर्वंत्वंविश्वभावन॥तथापिपृच्छ
सेयन्मांल्लोकाननुसृतःप्रभो॥ततोहमभिधास्यामिसीतायत्राधुनास्थिता॥रावणेनहृतासीतालंकायांवर्तते
धुना॥इतःसमीपेरामास्तेपंपानामसरोवरं॥ऋष्यमूकगिरिर्नामतत्समीपेमहानगः॥चतुर्भिःमंत्रिभिःसार्धंसु
ग्रीवोवानराधिपः॥भीतभीतःसदातत्रतिष्ठत्यमितविक्रमः॥वालिनश्चभयाद्भ्रातुस्तदगम्यंऋषेर्भयात्॥व
लिनातत्रगच्छत्वंतेनसख्यंकुरुप्रभो॥सुग्रीवेणचतेसर्वंकार्यंसंपादयिष्यति॥अहंत्वग्निंप्रवेक्ष्यामितवा

हृष्टा निरीक्ष्या निरामार्पश्रावरीमुदा॥ फलान्यमृतकल्पानि ददौ रामाय भक्तितः॥ पादौ संपूज्य कुसुमैः सु
गंधैः सानुलेपनैः॥ कृतातिथ्यं रघुश्रेष्ठमुपविष्टं सहानुजं॥ शावरी भक्तिसंपन्ना प्रांजलिर्वाक्यमब्रवीत्॥
अत्राश्रमे रघुश्रेष्ठ गुरवो मे महर्षयः॥ स्थिताः शुश्रूषणं तेषां कुर्वती समुपस्थिता॥ बहुवर्षसहस्राणि गतास्ते
ब्रह्मणः पदं॥ गमिष्यंतोब्रुवन्मां त्वं वसात्रैव समाहिता॥ रामो दाशरथिर्जातः परमात्मा सनातनः॥ राक्षसानां
वधार्थाय ऋषिणां रक्षणाय च॥ आगमिष्यति चैकाग्रध्यानेन निशि स्थिरा भव॥ इदानीं चित्रकूटाद्रावाश्रमे वसति
प्रभुः॥ यावदागमनं तस्य तावद्रक्ष कलेवरं॥ दृष्ट्वैव राघवं दग्ध्वा देहं यास्यसि तत्पदं॥ तथैवाकरवं राम त्वद्ध्या
नैकपरायणा॥ प्रतीक्षागमनं तेद्य सफलं गुरुभाषितं॥ तव संदर्शनं राम गुरूणामपि मे नहि॥ योषित्मूढाप्रमेया
त्मन् हीनजातिसमुद्भवा॥ तव दासस्य दासानां शतसंख्योतरस्य च॥ दासीत्वे नाधिकारोस्ति कुतः साक्षात्तवैव
हि॥ कथं रामाद्य मे दृष्टस्त्वं मनोवागगोचरः॥ स्तोतुं न जाने देवेश किं करोमि प्रसीद मे॥ श्रीराम उवाच॥ पुं
स्त्वे स्त्रीत्वे विशेषो वा जातिनामाश्रमादयः॥ न कारणं मद्भजने भक्तिरेव हि कारणं॥ यज्ञदानतपोभिर्वा वेदाध्यय
नकर्मभिः॥ नैव द्रष्टुमहं शक्यो मद्भक्तिविमुखैः सदा॥ तस्माद्भामिनि संक्षेपाद्वक्ष्येहं भक्तिसाधनं॥ सतां सं
गतिरेवात्र साधनं प्रथमं स्मृतं॥ द्वितीयं मत्कथालापस्तृतीयं मद्गुणेरणं॥ व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं

सदा॥ त्वद्रूपमेव सततं ध्यायन्नास्ति रघूत्तम॥ मन्मृषीणां सदा काश्यां तारकं ब्रह्मवाचकं॥ रामरामेत्युपदिशन्
सदा संतुष्टमानसः॥ अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः॥ सर्वे ते माययामूढास्त्वां न जानं
ति तत्त्वतः॥ नमस्ते रामभद्राय वेधसे परमात्मने॥ अयोध्याधिपते तुभ्यं नमः सौमित्रिसेवित॥ त्राहि त्राहि ज
गन्नाथ मायां मां नावृणोतु ते॥ श्रीराम उवाच॥ तुष्टोऽहं देव गंधर्व भक्त्या स्तुत्या च तेऽनघ॥ याहि मे परमं स्थानं
योगिगम्यं सनातनं॥ जपंति ये नित्यमनन्यबुद्ध्या भक्त्या मदुक्तं स्तवमागमोक्तं॥ ज्ञानसंभूतमवं विद्याय मां ध्या
तिनित्यानुभवानुमेयं॥ इति श्रीरामायणे मदध्यात्मे उमामहेश्वरसंवादे आरण्यकांडे नवमोऽध्यायः॥ तत
श्चा वरे स गंधर्वः प्रयास्यन् राममब्रवीत्॥ शबर्यास्ते पुरो भाग आश्रमे रघुनंदन॥ भक्ता त्वत्पादकमले भक्ति
मार्गविशारदा॥ त्वं प्रयाहि महाभाग सर्वं ते कथयिष्यति॥ इत्युक्त्वा प्रययौ सोऽपि विमानेनार्कवर्चसा॥ विष्णोः
पदं राम नाम स्मरणफलमीदृशं॥ त्यक्त्वा रण्ये तद्विपिनं घोरं सिंहव्याघ्रादिदूषितं॥ शनैराराश्रमपदं शबर्या
रघुनंदनः॥ शबरी राममालोक्य लक्ष्मणेन समन्वितं॥ आयांतं रोमहर्षेण प्रत्युत्थाया चिरेण सा॥ पतित्वा पाद
योरग्रे हर्षपूर्णाश्रुलोचना॥ स्वागतेनाभिनंद्याथ स्वासने सन्न्यवेशयत्॥ रामलक्ष्मणयोः सम्यक् पादौ प्रक्षा
ल्य भक्तितः॥ तज्जलेनाभिषिच्यांगमथार्घ्यादिभिरादृता॥ संपूज्य विधिवद्रामं ससौमित्रिं सपर्यया॥ संग्र

ध्या ६० भौ ल नी ४ ६०

म ३ पापा४

द्भिराहृते॥ सप्तभिरुत्तरगुणैर्विराजो धारणाश्रयः॥ त्वमेव सर्वकैवल्यं लोकास्तेवयवाः स्मृताः॥ पातालं ते पा

दमूलं पार्ष्णिस्तव महातलं॥ रसातलं ते गुल्फौ तु तलातलमितीर्यते॥ जानुनी सुतलं राम ऊरू ते वितलं तथा॥ अतलं

च महाराज जघनं नाभिगतं नभः॥ भूर्लोकस्ते हृदयस्ते नु वक्षः स्वर्वक्षःस्थलः॥ उरःस्थलं ते ज्योतींषि ग्रीवा ते महरुच्य

ते॥ वदनं जनलोकस्ते तपस्ते शंखदेशगं॥ सत्यलोको रघूश्रेष्ठ शीर्षण्यस्ते सदा प्रभो॥ इंद्रादयो लोकपाला बाहव

स्ते दिशः श्रुतिः॥ अश्विनौ नासिके राम वक्त्रं तेग्निरुदाहृतः॥ चक्षुस्ते सविता राम मनश्चंद्र उदाहृतः॥ भ्रूभंग एव का

लस्ते बुद्धिस्ते वाक्पतिर्भवेत्॥ रुद्रोहंकाररूपस्ते वाचः छंदांसि तेव्ययः॥ यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि

दंताः

द्विजालयः॥ हासो मोहकरी माया सृष्टिस्तेपांगमोक्षणं॥ धर्मः पुरस्तेधर्मश्च पृष्टभाग उदीरितः॥ निमिषोन्मेषणे रा

त्रिर्दिवा चैव रघूत्तम॥ समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो॥ रोमाणि वृक्षौषधयो रेतो वृष्टिस्तव प्रभो॥ महिमा ज्ञा

नशक्तिस्ते एवं स्थूलं वपुस्तव॥ यदिदं स्थूलरूपे ते मनः संधार्यते नृभिः॥ अनायासेन मुक्तिः स्यात्ततोन्यत्र हि किंचन॥

अतोहं राम ते रूपं स्थूलमेवानुभावये॥ यस्मिन् ध्याते प्रेमरसः सरोमपुलको नरः॥ तदेव मुक्तिः स्याद्राम यदा ते स्थू

लभावकः॥ तदप्यास्तां तवैवाहं रूपं ते स्थूलमेवानुभावये॥ धनुर्बाणधरं श्यामं जटावल्कलभूषणं॥ अपी

च्यावयसं सीतां विचिन्वंतं सलक्ष्मणं॥ इदमेव सदा मे स्यान्मानसे रघुनंदन॥ सर्वज्ञः शंकरः साक्षात्पार्वत्या सहितः

स्थितः

...मूर्तिविभो...

ताकारःहततउत्प्लुत्यगोपुरं॥तत्रैवैकंस्तंभमादायहत्वातान्रक्षिणः॰क्षणात्॥विचिंत्यकार्यशेषंसप्रासादाग्रान्महा
गृहं॥ततप्लुत्योत्प्लुत्यसंदीप्तपुच्छेनमहताकपिः॥ददाहलंकामखिलांसाट्टप्रासादतोरणां॥हातातपुत्रना
थेतिक्रंदमानैःसमंततः॥व्याप्तंप्रासादशिखरेप्यारूढादैत्ययोषितः॥देवताइवदृश्यंतेपतंत्यःपावकेखिलाः
॥विभीषणगृहंत्यक्त्वासर्वंभस्मीकृतंपुरं॥ततउत्प्लुत्यजलधौहनूमान्मारुतात्मजः॥लांगूलंमार्जयित्वातःस्व
स्थचित्तोबभूवह॥वायोःप्रियसखित्वाच्चसीतयाप्रार्थितोनलः॥नददाहहरेःपुच्छंबभूवात्यंतशीतलः॥यन्नाम
अध्या०रा०सुंदर संस्मरणाधूतसमस्तपापाःतापत्रयानलमपीहतरंतिसद्यः॥तस्यैवकिंरघुवरस्यविशिष्टदूतःसंतप्यतेकथम
रकांडे ५६ सौप्राकृतानलेन॥ इतिश्रीमदध्यात्मरामायणेउमा॰सुंदरकांडेचतुर्थःसर्गः॥ सूतउवाच॥ ततःसीतां
१८० नमस्कृत्यहनुमानब्रवीद्वचः॥आज्ञापयतुमांदेविव्रजते॰रामसंनिधिं॥गच्छामिरामस्त्वांद्रष्टुमागमिष्यतिस १८०
त्वरः॥इत्युक्त्वात्रिःपरिक्रम्यजानकींमारुतात्मजः॥प्रणम्यप्रस्थितोगंतुमिदंवचनमब्रवीत्॥देवगच्छामिभद्रंतेतू
९० र्णंद्रक्ष्यसिराघवं॥लक्ष्मणंचससुग्रीवंवानरायुतकोटिभिः॥ततःप्राहहनूमंतंजानकीदुःखकर्षिता॥त्वांदृष्ट्वा
विस्मृतंदुःखंइदानींत्वंगमिष्यसि॥इतःपरंकथंवर्तेरामवार्ताश्रुतिविना॥ मारुतिरुवाच॥ यद्येवंदेविमे
स्कंधमारोहक्षणमात्रतः॥रामेणयोजयिष्यामिमन्यसेयदिजानकि॥ सीतोवाच॥ रामःसागरमाशोष्य

राक्षसमेकमब्रवीत्॥पार्श्वस्थितं मारय त्वं दुष्टाः कपिं पश्यंतु सर्वे सुरमित्रबांधवाः॥निवारयामास ततो
विभीषणो महासुरं सायुधमुद्यतं वचो॥राजन्वधार्हो न न वेत्त्कश्च वनप्रतापयुक्तो परराजवानरः॥हते
स्मिन्नु वानरे दूते वार्त्तां को वा निवेदयेत॥रामाय त्वं यमुद्दिश्य परधाय समुपस्थितः॥अतो वधसमं किंचि
द्दण्डं चिंतय वानरे॥स विज्ञो गच्छतु हरिर्यद्दृष्ट्वायास्पति द्रुतं॥रामः सुग्रीवसहितस्ततो युद्धं भवेत्तव॥
विभीषणवचः श्रुत्वा रावणोप्येनमब्रवीत्॥वानराणां हि लांगूलं महामानो भवेत्किल॥अतो वस्त्रादिभिः पु
च्छं वेष्टयित्वा प्रयत्नतः॥वह्निना योजयित्वैनं भ्रामयित्वा पुरे नितः॥विसर्जयत पश्यंतु सर्वे वानर पू[illegible]॥तथेति किं
कराः सर्वे तत्स्थितास्त्वरयान्वशं॥वस्त्रागारात्तु वस्त्राणि समानीय सहस्रशः॥वेष्टि[illegible]मासुस्ते पुच्छं पूर्णं नैवाभवत्तदा
॥तथेति शाणपट्टैश्च वस्त्रैश्चान्यैर्वनेचराः॥नगरस्थानि वस्त्राणि सर्वाण्यानीय यत्नतः॥वेष्टितं मासुस्ते पुच्छं न तो नाया
ति पूर्ततां॥[illegible]॥वस्त्राभावेन संजातः कृपया सूक्ष्मरूपवान्॥ततो हर्षेण ते दूता लांगूले वेष्टिते ब्रुवन्॥तैलान्ते
र्वेष्टयामासुर्लांगूलं मारुतेः ईदृशं पुच्छाग्रे किंचिद्दनलं दीपयित्वा परा द्रुताः॥रज्जुभिः सुदृढं बध्वा धृत्वा च बलिनो
सुराः समंताद्भ्रमयामासुश्चौरोयमिति वादिनः॥तूर्यघोषैर्घोषयंतस्ताडयंतो मुहुर्मुहुः॥हनुमतापि तत्सर्वं सोढं किं
चिच्च कौतुकेन॥गत्वा तु पश्चिमद्वारसमीपं तत्र मारुतिः॥सूक्ष्मो बभूव बंधेभ्यो निःसृतः पुनरप्यसौ॥बभूव पर्व

तपाशाबंधनंविलोकयंतंनगरंविनीतवत्॥ ताडयन्मुष्टितलैस्तु कोपनापौराः॥ समंतादनुयातुमीहि
नु॥ ब्रह्मास्त्रमेनंब्रह्मणमावसंमतं॥ कृत्वागतेब्रह्मवैराणसत्वरं॥ ज्ञात्वा हनुमानपिफल्गुरज्जुनिर्धृतो
ययौ कार्यविशेषगौरवात्॥ संतांतरस्यस्य च रावण॥ तं पुरो निधाया हवल्लारिजितदा॥ ब्रह्मामयावृस्त
वरेणवानरः॥ समागतोनेनहतामहासुरः॥ यत्युक्तमत्रार्यविचार्यमंत्रिभिर्विधीयतामेषपनल्लोकिको
हरिः॥ ततोविलोक्याहसरावणोम्बरः॥ प्रहस्त[illegible]स्थितमं[illegible]दिनं॥ प्रहस्तपृष्ठेनमसौ किमागतः॥ किम
त्रकार्यं कुतएववानरः॥ वनंकिमर्थं सकलं विन[illegible]तंहत[illegible]र्थममराक्षसावल्लात्॥ ततः प्रहस्तोहनु
प्रेषितोसि मंतमादरात्पृष्ट केनप्रहितोसिवानरः॥ भयंचतेमा[illegible]विम[illegible]हसिमयासत्यंवदस्वाखिलराक्षससन्निधौ॥
ततोतिहर्षात्पवनात्मजोरिपुंनिरीक्ष्यलोकत्रयकंटकासुरं॥ वक्तुंप्रचक्रेरघुनाथसत्कथांक्रमेणरामंम्र
नसास्मरन्मुहुः॥ श्रिणुस्फुटंदेवगणद्यमित्रहरामस्यदूतोहमशेषहृत्स्थि[illegible]तेः॥ यस्याखिलेशस्यहृ त
८८ धुनात्वयाभार्यास्वनाशायशुनेवसद्धविः॥ सराघवोभ्येत्यमातंगपर्वतंसुग्रीवमैत्रीमनलस्यसन्निधौ ८८
॥ कृत्वैकबाणेननिहत्यवालिनंसुग्रीवमेवाधिपतिंचकारतं॥ सवानराणामधिपोमहाबलोमहाबलवा
88 नरयूथकोटिभिः॥ रामेणसार्द्धंसहलक्ष्मणेनभोः पूर्वं[illegible]र्षयुतोवसिष्ठते॥ संचोदितास्तेनमहाहरीश्वरा
स्व

नबुएस्मकृत मे
घनोदः सपवैं
नेतोरे सस्रंद

नदृष्ट्वाकाशेसमुद्गरः॥ गगनाच्चरितोमूर्ध्निमुद्गरेणव्यताड्यत॥ हत्वातमक्षंनिःशेषंबलंसंवचिकारसः॥ त
तच्छ्रुत्वाकुमारस्यवधंराक्षसपुंगवः॥ क्रोधेनमहताविष्टइंद्रजेतारमब्रवीत॥ पुत्रगच्छाम्यहंतत्रयत्रास्तेपुत्र
हारिपुः॥ पितुःरेतंवचःश्रुत्वाउवाचेंद्रजेतातमब्रवीत॥ हत्वातमपवावबध्वाआनयिष्यामितेतिकं॥ इंद्रजित्पि
तरंप्राहत्यजशोकंमहीपते॥ मयिस्थितेकिमर्थंत्वंनाथसेदुःखितंवचः॥ वध्वानेष्येद्रुतंतातवानरंब्रह्मपाशत
॥ इत्युक्त्वातंनमुद्यम्यइंद्रजेतासुवीर्यवान॥ रथेनमहतागछद्रथानीकेनसंवृतः॥ आयांतंतमथोदृष्ट्वास्तंनमु
त्पाद्यवेगतः॥ उत्पपातनचोदेशंगरुत्मानिवमारुतिः॥ ततोधमंतंनेनसिंहनूमंतंछिन्नमुखैः॥ विध्वातस
त्रिशेनागांपं निस्नात्मनेत्रुनः॥ रुदयपा पुगलंषद्त्रिरे नवाच्चधिं॥ नेदयित्वाततोघोरंसिंहनादमथाकरे
त॥ ततोतिहर्षितहनुमान्स्तंभमुद्यम्यवीर्यवान॥ जघानसारथिंसाश्वंरथंचाचूर्णयत्क्षणात॥ ततोन्यर
थमारुह्यमेघनादोमहाबलः॥ ततोब्रह्मास्त्रमादायबध्वावानरपुंगवं॥ निनायनिकटंराज्ञोरावणस्यमहा
बलः॥ यस्यनामसततंजपंतियेऽज्ञानकर्मकृतबंधनंक्षणात॥ सद्यएवपरिमुच्यतत्पदंयान्तिकोटिरविभासु
रंशिवं॥ तस्यैवरामस्यपदांबुजेसदाहृत्पद्ममध्येप्रविधायमारुतिः॥ सदैवनिर्मुक्तसमस्तबंधनःकिं
तस्यपाशैरितरैश्चबंधनैः॥ इतिश्रीमद[illegible]रामायणेउमःसुंदरकांडेतृतीयःसर्गः॥ यांतंकपींद्रं

नवं त्वमेव जानं तु मायां राक्षसनिर्मितां ॥ नाहमेनं विजानामि दुःखशोकसमाकुला ॥ इत्युक्तोऽन्तरितं गत्वा
राक्षस्यो भयपीडिताः ॥ हनुमता कृतं सर्वं रावणायन्यवेदयत् ॥ देव कश्चिन्महासत्त्वो वानरः कृतिदेह
नृत ॥ सीतया सह संभाष्य अशोकवनिकां हणणत ॥ उत्पाद्य चैत्यप्रासादं बभंज मितिविक्रमः ॥ प्रास
दरक्षिणः सर्वान् हत्वा तत्रैव तस्थिवान् ॥ तच्छ्रुत्वा तूर्णमुत्थाय वनभंगं महाप्रियं ॥ किंकरान्प्रेषयामा
स नियुतं राक्षसाधिपः ॥ निर्भिन्नचैत्यप्रासादप्रथमांतरसंस्थितः ॥ हनुमान्पर्वताकारो लांगूलं नह
तायुधः ॥ किंचिल्लांगूलचलनो रक्तास्यो भीषणाकृतिः ॥ आयतं तं महासंघं राक्षसानां ददर्श सः ॥ चक
र सिंहनादं च स कृत्वा तेमुमुहुर्नरा ॥ हनूमंतमथो दृष्ट्वा किंकरा भीषणाकृतिं ॥ निजघ्नुर्विविधास्त्रौघैः स
८७ र्वे राक्षसघातिनं ॥ ततउत्थाय हनुमान्मुद्गरेण समंततः ॥ निष्पिपेष क्षणादेव मशकानिव यूथपः ॥ निह
तान्किंकरान् श्रुत्वा रावणः क्रोधमूर्छितः ॥ पंच सेनापतींस्तत्र प्रेषयामास दुर्मदान् ॥ हनुमानपि तान्सर्वा ८७
न्पूर्ववद्वानरेश्वरः ॥ क्षणान्निःशेषतो हत्वा लोहस्तंभेन मारुतिः ॥ पूर्वस्थानमुपाश्रित्य प्रतीक्षन्राक्षसा
न्स्थितः ॥ रावण उवाच ॥ अक्ष त्वं यः शीघ्रमेहि त्वं वानरस्य वधाय च ॥ प्रेयुतं राक्षसानां च गृहीत्वा वनमध्यगं
॥ वानरं बंधयित्वा तं समानय ममांतिके ॥ ततो जगाम बलवान्कुमारोऽक्षः प्रतापवान् ॥ तमुत्पपात हनुमा

रावणस्य कनेष्ठ सुतः अक्षकुमारः १

अष्टर सि

87

अस्मद्रव हापसंसनीतो लोकान्भ्रमन्मुनः॥ इंद्राब्रह्मादिभिश्चापि न शक्यो रक्षितुं तदा॥ रामस्य पादयोरग्रेऽप
तद्वीत्पादयानिधिः॥ शरणागतमालोक्य रामस्तमिदमब्रवीत्॥ अमोघमेतदस्त्रं मे दत्वैकाक्षमितो ब्रज॥
सर्वं दत्वा ततः काकः एवं पौरुषवानपि॥ उपेक्षते किमर्थं मां इदानीं सोपि राघवः॥ हनुमानपि तामाह श्रुत्वा
सीतानुभाषितं॥ देवि त्वां यदि जानाति स्थितामत्र रघूत्तमः॥ करिष्यामि क्षणाद्भस्म लंकां राक्षसमंडितां॥ जा
नकी प्राह तं वत्स कथं त्वं योत्स्यसेऽसुरैः॥ अतिस्वल्पवपुः सर्वे वानराश्च भवादृशाः॥ श्रुत्वा तद्वचनं देव्याः पू
र्वरूपमदर्शयत्॥ मेरुमंदरसंकाशं रक्षोगणविभीषणं॥ दृष्ट्वा सीता हनूमंतं महापर्वतसन्निभं॥ हर्षेण म
हताविष्टा प्राह तं कपिकुंजरं॥ समर्थोसि महासत्व द्रक्ष्यंति त्वां महाबलं॥ राक्षस्यस्ते शुभः पंथाः गच्छ रा
मांतिके द्रुतं॥ ततः प्रस्थापितो गच्छन् जानकीं प्रणिपत्य सः॥ किंचित् दूरमथो गत्वा स्वात्मन्येवानुचिंतयन्
॥ कार्यार्थमागतो दूतः स्वामि कार्याविरोधतः॥ अन्यत्किंचिदसंपाद्य गच्छत्यधम एव सः॥ अतो ह्यं किंचि
त्वा दन्यच्च कृत्वा दृष्ट्वाथ रावणं॥ संभाष्य च ततो रामं दर्शनार्थं व्रजाम्यहं॥ इति निश्चित्य मनसा वृक्षखंडान्म
हाबलः॥ उत्पाद्याशोकवनिकां निर्वृक्षामकरोत्क्षणात्॥ सीताश्रयनगं त्यक्त्वा वनं शून्यं चकार सः॥ उ
त्पाटयंतं विपिनं दृष्ट्वा राक्षसयोषितः॥ अपृच्छन् जानकीं कोसौ वानराकृतिरुद्भटः॥ जानक्युवाच॥

नुः

सपुत्रं सबलं रामो यदि मां मोचयेत्प्रभुः ॥ न तस्य सदृशो वीर्यवीर वर्त्मैयवस्मितं ॥ यथा मां तारयेद्रामो ह
त्वाशीघ्र दृष्टा ननं ॥ तथा यतस्व हनुमन् वाचा धर्ममवाप्नुहि ॥ हनुमान पितामाह देवि दृष्टो यदा मया ॥
रामः सलक्ष्मणः शीघ्रं आगमिष्यति सायुधः ॥ सुग्रीवेणस सैन्येन हत्वा दशमुखं बलात् ॥ समानेष्यति
देवि त्वामयोध्यां नात्र संशयः ॥ तमाह जानकी रामः कथं वारिधिमाततं ॥ तीर्त्वा यास्यत्यमेयात्मा वानर
नीकपैः सह ॥ हनुमानाह मे स्कंधावारुह्य पुरुषर्षभौ ॥ आयास्यतः स सैन्यश्च सुग्रीवो वानरेश्वरः ॥ विह
यसा ह्लणेनैव तीर्त्वा वारिधिमाततं ॥ निर्दहिष्यति रक्षौघान् त्वत्कृते नात्र संशयः ॥ अनुज्ञां देहि मे देवि
गच्छामि त्वरयान्वितः ॥ द्रष्टुं रामं सह भ्रात्रा त्वरयामि तवांतिकं ॥ देवि किंचिदभिज्ञानं देहि मे येन राघवः
८६ ॥ विश्वसेन्मां प्रयत्नेन ततो गंता समुत्सुकः ॥ ततः किंचिद्विचार्याथ सीता कमललोचना ॥ विमुच्य के ८६
शपाशांतेस्थितं चूडामणिं ददौ ॥ अनेन विश्वसेद्रामस्त्वां कपींद्र सलक्ष्मणः ॥ अभिज्ञानार्थमन्यच्च वद
मि तव सुव्रत ॥ चित्रकूटगिरौ पूर्वमेकदा रामनिषेच्छया ॥ ततो रामः प्रबुध्याथ दृष्ट्वा पादं कृतव्रणं ॥ केन ते दु
ष्कृतं चैतद्विप्रियं मे दुरात्मना ॥ इत्युक्त्वा पुरतोपश्यन्वायसं मां पुनः पुनः ॥ अभिद्रवंतं रक्तास्यं नखैस्तुंडे
स्तु कोपहृ ॥ तृणमेकमुपादाय दिव्यास्त्रेण [illegible] ऽभियोजयत् ॥ चिक्षेप लीलया रामो वायसोपरि तत्ज्वलन् ॥

ण॥१

ती

तः स्थितः ॥ ऋष्यमूकमगाद्रामः शबर्या वेदितः सुधीः ॥ सुग्रीवो ऋष्यमूकस्थो दृष्टवान्राममलक्ष्मणौ ॥ भी
तो मा प्रेषयामास ज्ञातुं रामस्य हृद्गतं ॥ ब्रह्मचारीवपुर्धृत्वागतो हं रामसन्निधिं ॥ ज्ञात्वा रामस्य सद्भावं स्कं
धोपरि निधाय यौ ॥ नीत्वा सुग्रीवसामीप्यं सख्यं चाकरवं तयोः ॥ सुग्रीवस्य हृता नार्या वालिना ते रघूत्तमः ॥
जघानैकेन बाणेन ततो राज्ये न्यवेचयत् ॥ सुग्रीवे वानराणां स प्रेषयामास वानरान् ॥ दिग्भ्यो महाबला वीरा
स्त्व दस्याः परिमार्गणे ॥ गच्छंतं राघवो दृष्ट्वा मामभाषत सादरं ॥ त्वयि कार्यमशेषं मे स्थितं मारुतनंदन ॥ बूहि
मे कुशलं सर्वं सीतायै लक्ष्मणस्य च ॥ अंगुलीयकमेतन्मे परिज्ञानार्थमुत्तमं ॥ सीतायै दीयतां साधु मन्नामाक्ष
रमुद्रितं ॥ इत्युक्त्वा प्रददौ मह्यं कराग्रादंगुलीयकं ॥ प्रयत्नेन मया नीतं देवि पश्यांगुलीयकं ॥ इत्युक्त्वा प्रददौ देव्यै
मुद्रिकां मारुतात्मजः ॥ नमस्कृत्वा स्थितो दूरात् बद्धांजलिपुटो हरिः ॥ दृष्ट्वा सीता प्रमुदिता रामनामांकितां त
दा ॥ मुद्रिकां शिरसा धृत्वा स्रवदानंदनेत्रजा ॥ कपे मे प्राणदाता त्वं बुद्धिमानसि राघवे ॥ रक्तो सि प्रियकारी त्वं
विश्वासो स्ति तवैव हि ॥ नो चेन्मत्संनिधिं चान्यं पुरुषं प्रेषयेत्कथं ॥ हनुमन्दृष्टमखिलं मम दुःखादिकं त्वया ॥
सर्वं कथय रामाय यथा मे जायते दया ॥ मासद्वयावधिः प्राणाः स्थास्यंति मम सत्तम ॥ नागमिष्यति चेद्रामो न
यिष्यति मां महाखलः ॥ अतः शीघ्रं कपींद्रेण सुग्रीवेण समन्वितः ॥ वानरानीकपैः सार्द्धं हत्वा रावणमाहवे ॥

सपरितो वानरान् परिमार्गिणः॥ सीताया स्तत्र चैकोहं सुग्रीवसचिवो हरिः॥ संपातिवचनाच्छीघ्रं उल्लंघ्य
शतयोजनं॥ समुद्रं नगरीं लंकां विचिन्वन्जानकीं शुभां॥ शनैरशोकवनिकां विचिन्वन्शिंशुपातरुं॥ अद्रा
क्षं जानकीमत्र शोचंतीं दुःखसंप्लुतां॥ रामस्य महिषीं देवीं कृतकृत्योहमागतः॥ इत्युक्त्वोपररामाथ मारु
तिर्बुद्धिसत्तमः॥ सीता क्रमेण तत्सर्वं श्रुत्वा विस्मयमाययौ॥ किमिदं मे श्रुतं व्योम्नि वायुना समुदीरितं॥ स्व
प्नो वा मन्मनोभ्रांतिर्यदि वा सत्यमेव तत्॥ निद्रा मे नास्ति दुःखेन जानाम्येतत्कुतो भ्रमः॥ येन मे कर्णपीयूषं व
चनं समुदीरितं॥ स दृश्यतां महाभागः प्रियवादी ममाग्रतः॥ श्रुत्वा तज्जानकीवाक्यं हनुमान्पत्रखंडतः॥
बटकु ७ अवतीर्य शनैः सी ताः पुरतः समवस्थितः॥ कलविंकप्रमाणांगो रक्तास्यः पीतवानरः॥ ननाम शनकैः
८५ सीतां प्रांजलिः पुरतः स्थितः॥ दृष्ट्वा तं जानकी भीता रावणोयमुपागतः॥ मां मोहयितुमायातो मायया वानर ८५
कृतिः॥ इत्येवं चिंतयित्वा सा तूष्णीमासीदधोमुखी॥ पुनरप्याह तां सीतां देवि यं त्वं विशंकसे॥ नाहं तथावि
85 धो मातः त्यज शंकां मयि स्थितां॥ दासोहं कोशलेंद्रस्य रामस्य परमात्मनः॥ सचिवोहं हरींद्रस्य सुग्रीवस्य
शुभप्रदे॥ वायोः पुत्रोहमखिलप्राणभूतस्य शोभने॥ तच्छ्रुत्वा जानकी प्राह हनुमंतं कृतांजलिं॥ वानराणां
मनुष्याणां संगतिर्घटते कथं॥ यथा त्वं रामचंद्रस्य दासोहमिति भाषसे॥ तामाह मारुतिः प्रीतो जानकीं दृ

...मरंत्रे... बलः॥ ...देहीममात्मयंथीवंधना... निश्चित्य बुद्धिं तां मरणाय पाजी: ॥ कीर्ति
... रुनुमानकिंचित्‌विचार॥५

...त्रनिद्रावशमुपागता:॥तज्जितारादासी... नीताऽसीति विदुषा:॥श्चातारं नाधिगच्छंती दुः
...परिमूर्छिता॥ ...निः पूर्णमनयना ...नीदमवदीत्‌॥प्रभाते नदृश्यामि तां राक्षस्यो मां न संशयः॥
...मेवमरणं केनोपायेन भवेत्‌॥एवं सदुःखेन परिप्लुता सा विमुक्त... ठं रुदती विराय ...
... कं कृत निश्चयमनोनजानती किंचिदुपायमंगना॥इति श्रीमद्‌ध्यात्मरामायणे सुंदरकांडे द्वितीय
...ः॥३॥ दुःखेन न वामोऽहं पेश... यवे विना॥जीवितेन फलं किंचित्‌ विचार्येत दभाषत:॥शनैः शनैः स
...रूपे जानक्याः श्रोत्रगं वचः॥इक्ष्वाकुवंशसंभूतो राजा दशरथो महान्‌॥अयोध्याधिपतिस्तस्य चत्वा
रो लोकविश्रुताः॥पुत्रा देवसमाः सर्वे लक्षणै रूपलक्षिताः॥रामश्च लक्ष्मणश्चैव भरतश्च शत्रुघ्न॥ज्ये
ष्ठो रामः पितुर्वाक्याद्दंडकारण्यमागतो॥लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह॥उवास गौतमी तीरे
पंचवट्यां महामनाः॥तत्र नीता महाभागा सीता जनकनंदनी॥रक्षिते राम चंद्रेण रावणेन दुरात्मना॥त
तो रामोऽतिदुःखार्तो मार्गमाणोऽथ जानकीं॥जटायुषं पक्षिराजं अपश्यत्पतितं भुवि॥तस्मै दत्वा दिवं शी
घ्रं ऋष्यमूकमुपागमत्‌॥सुग्रीवेण कृता मैत्री रामस्य विदितात्मना॥तद्भार्याहारिणं हत्वा वालिनं रघुनंद
नः॥राज्ये ऽभिषिच्य सुग्रीवं मित्रकार्यं चकार सः॥ ...समानीय वानरान्‌ वानरप्रभुः॥प्रेषयामा

रेसीतायदिमिवद्रागानवेत्।।तदा सर्वसुखोपेतारा[illegible]त्ति सामया।।यदि मासद्वयादूर्द्ध्वं मत्र्यांना
मिनंदयति।।तदा मे प्रातरुत्थाय हत्वा कुरु [illegible]मानुषी।।[illegible]सुता पयोस्त्रीभिः रावणेनांतःपुरालयं।।
राक्षस्यो जानकीमित्य भीषयंत्यश्च तर्जनैः।।[illegible]कौ जानकी मा हयौवनं ते वृथागतं।।रावणेन समा
साद्य सफलं तु न विष्यति।।अपरा चाह कोपे[illegible] किंचिल्लंबेन [illegible] जानकी।।इदानीं छेद्यतामंगं किल रूपवपृ
ष्कृ पृथक्।।अन्या तु खड्गमुद्यम्य जा[illegible]तुमुद्यता।।अन्या करालवदना विदार्यास्यमभाषयत्।।
८४ एवं तां भीषयंतीस्ता राक्षसीर्विकृताननाः।।[illegible]नेवार्यत्रिजटा रक्षाराक्षसीवाक्यमब्रवीत्।।शृणुध्वं दुष्ट ८४
राक्षस्यो मद्वाक्यं वो हितं न वेत्।।न भीष[illegible]र दंतीं नमस्कुरुत जानकीं।।इदानीमेव मे स्वप्ने रामः क
84 मललोचनः।।आरुह्यैरावतं शुभ्रं लक्ष्म[illegible]तः।।दग्ध्वा लंकां पुरीं कृत्स्नां हत्वा रावणमाहवे।।
आरोप्य जानकीं स्वांके स्थितो दृष्टो गजमूर्द्धनि[illegible]गोमयह्रदे तैलाभ्यक्तो दिगंबरः।।आगाह्रतपुत्र
पौत्रैश्च कृत्वा वदनमालिकां।।विभीषणस्तु रा[illegible]नि यो हृष्टमानसः।।सेवां करोति रामस्य पादयोर्भ
क्तिसंयुतः।।सर्वेषां रावणादीनां रामो हत्वा सकुलमंजसा।।विभीषणायाधिपत्यं दत्वा सीतां शुभाननां।।अं
केनिधाय स्वपुरीं गमिष्यति न संशयः।।त्रिजटाया वचः श्रुत्वा भीतास्ता राक्षसस्त्रियः।।तूष्णीमासि[illegible]

तुं जानेसि न जानाति हृतत्वो निर्गुणोधमः ॥ त्वमानीतामयासा च दुःखशोकसमाकुला ॥ इदानीमपि ना
यातिशक्तिहीनः कथं वृतेत ॥ निःसत्वो निर्मि[illegible] पंडितमानवान् ॥ नराधमं त्वं किमु खं किं करिष्य
सि[illegible]ति नि ॥ त्वय्यतीव समासक्तं मां न जानत्स्व[illegible] ना देवगांधर्वनागानां यक्षकिंनरयोषितां ॥ त्वं दिष्टा
सि निपो[illegible] त्वं यदि मां प्रति [illegible]रे ॥ रावणस्य वचः श्रुत्वा सीता मर्मविभेदन[illegible] उवाचाधोमुखी नूनं
निधाय तृणमंतरे ॥ राघवा[illegible] तनूनं निहृतरूपं धृतं त्वया ॥ रक्षितेरा[illegible]स्यां त्वं शुनीव हविरध्वरे ॥ हृ
[illegible]वी न त्रसि मां नीचतत्फलं प्राप्[illegible] चिरात् ॥ यदा रामशराघातविदारित[illegible]पुर्भवान् ॥ जानीषि मानुषं राम
[illegible] सियमांति किं ॥ समुद्रं शोषयित्वा वा शरैर्बध्वापि वारिधिं ॥ हंतुं त्वां समरे रामो लक्ष्मणेन समन्वित
॥ [illegible]गमिष्यत्यसंदेहो द्रक्ष्यसे राक्षसाधम ॥ त्वां सपुत्रं सह बलं हत्वा नेष्यसि मां पुरं ॥ श्रुत्वा रक्षःपतिः क्रुद्धो
[illegible]नकी परुषाक्षरं ॥ ना का क्रोधसमाविष्टो खड्गमुद्यम्य सत्वरः ॥ हंतुं जनकराजस्य तनयां ताम्रलोच
न ॥ मंदोदरी निवार्याह पतिं पतिहिते रता ॥ [illegible]जेनां मानुषीं दीनां दुःखितां कृपणां कृशां ॥ देवगांधर्वनागानां
बह्व्यः संति वरांगनाः ॥ त्वामेव वरयंत्वद्य मेदमत्तविल[illegible]नाः ॥ ततो वै दशग्रीवो राक्षसीर्विकृताननाः
[illegible]यमेव[illegible]गारी[illegible]तान विष्य[illegible]तिस कामना ॥ तं[illegible]रितं तर्जनाद्दारणादिभिः ॥ [illegible]सा स्यंत

ता

ज्ञात्वा रामं रमापतिं॥वाली प्राणान्परित्यजन् रामं वचनमब्रवीत्॥राम राम महाभाग जाने त्वां परमेश्वरं॥अ
ज्ञानता मया किंचित्तदुक्तं तत्क्षंतुमर्हसि॥साक्षात्त्वच्छरघातेन विशेषेण तवाग्रतः॥त्यजाम्यसून्महायोगी दुर्ल
भं तव दर्शनं॥यन्नाम विवशो गृह्णन्म्रियमाणः परं पदं॥याति साक्षात्स एव त्वं मुमूर्षोर्मे पुरः स्थितः॥देव जाना
मि पुरुषं त्वां श्रियं जानकीं शुभां॥रावणस्य वधार्थाय जातं त्वां ब्रह्मणार्थितं॥अनुजानीहि मां राम यांतु त्वत्पदमु
त्तमं॥मम तुल्यबलो बालः अंगदस्त्वं दयां कुरु॥विशल्यं कुरु मे राम हृदयं पाणिना स्पृशन्॥तथेति बाणमुद्धृत्य शुद्धः
रामो पस्पर्श पाणिना॥त्यक्त्वा तद्वानरं देहममरेंद्रोऽभवत्क्षणात्॥वाली रघूत्तमशरात्त्रिहतो विमृष्टो रामेण शी
तलकरेण सुखाकरेण॥सद्यो विमुच्य कपिदेहमनन्यलभ्यं प्राप्तः पदं परमहंसगणैर्दुरापं॥ इति श्रीमद
ध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे द्वितीयोऽध्यायः॥ निहते वालिनि रणे रामेण परमात्मना
६७ ॥दुद्रुवुः वानराः सर्वे किष्किंधां भयविह्वलाः॥तारामूचुर्महाभागे हतो वाली रणाजिरे॥अंगदं परिरक्षाय मंत्रिणः ६७
67 परिचोदय॥चतुर्द्वारकपाटादीन्बध्नीमो हि पुरीं॥वानराणां तु रा~~ज्येन नगिरेण धनेन वा॥इदानीमेव~~ जानमंगदं
कुरु भामिनि॥निहतं वालिनं श्रुत्वा तारा शोकविमूर्छिता॥अताडयत्स्वपाणिभ्यां शिरो वक्षश्च भूरिशः॥किं मे राज्येन
तं भरत उवाच अहमप्यागमिष्यामि सेवे त्वां लक्ष्मणो यथा नो चेत्प्रायोपवेशेन त्यक्ष्याम्येतत्कलेवरं
इत्येवं निश्चयं कृत्वा दर्भानास्तीर्य चाग्रतः मनसापि विनिश्चित्य प्राङ्मुखोपविवेशासः भरतस्यापि निर्बं
धं दृष्ट्वा रामोपि विस्मितः नेत्रान्तसंज्ञां गुरवे चकार रघुनन्दनः एकान्ते भरतं प्राह वसिष्ठो ज्ञानिनां वरः
वत्स गुह्यं शृणुष्वेदं मम वाक्यात्सुनिश्चितं रामो नारायणः साक्षाद्ब्रह्मणा याचितः पुरा रावणस्य वधा
र्थाय जातो दशरथात्मजः योगमायापि सीतेति जाता जनकनन्दिनी शेषोपि लक्ष्मणो जातो राममन्वे
ति सर्वदा रावणं हन्तुकामास्ते गमिष्यन्ति न संशयः कैकेय्या वरदानादि यच्चान्यन्निष्ठुरभाषणं सर्वं देवकृतं
नो चेदेवं सा भाषेत कथं तस्मात्त्यजाग्रहं तात रामस्य विनिवर्तने निवर्तस्व महासैन्यो मातृभिः सहि ४२
तः पुरं रावणं सकुलं हत्वा शीघ्रमेवागमिष्यति इति श्रुत्वा गुरोर्वाक्यं भरतो विस्मयान्वितः गत्वास
मीपं रामस्य विस्मयोत्फुल्ललोचनः भरतोपश्यद्दृशौ श्रीरामं ब्रह्मांडमंडले अतसीपुष्पसंकाशं पीतवास
समच्युतं चतुर्भुजं शंखचक्रगदापंकजधारिणं प्रकृत्या सहितं श्यामं सीतया योगमायया दृष्ट्वैवं विस्म

॥ जेन्ते उपविष्टं समागम्य भरतो राममब्रवीत् राम राम महाभाग स्वात्मानमभिषेचय राज्यं पालय पै
त्र्यं ते ज्येष्ठस्त्वं मे पिता यथा क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनं इष्ट्वा यज्ञैर्बहुविधैः पुत्रानुत्पाद्य तंतवे
राज्ये पुत्रं समारोप्य गमिष्यसि तपोवनं इदानीं वनवासस्य कालो नैव प्रसीद मे मातुर्मे दुःकृतं किंचिन्न स्मर्तुं
नार्हसि पाहि नः इत्युक्त्वा चरणौ भ्रातुः शिरस्याधाय नंदिनः रामस्य पुरतः साक्षाद्दंडवत्पतितो भुवि उ
त्थाप्य राघवः शीघ्रमारोप्यांके तिनं दिनतः उवाच भरतं रामः स्नेहार्द्रनयनः शनैः शृणु वत्स प्रवक्ष्यामि त्वया
यत्तत्तथैव तत् किंनु मामब्रवीत्तातो नव वर्षाणि पंच च उषित्वा दंडकारण्ये पुरं पश्चात्समाविश इदानीं भरता
ये हं राज्यं दत्तं मया खिलं ततः पित्रैव सुव्यक्तं राज्यं दत्तं तवैव हि दंडकारण्यराज्यं मे दत्तं पित्रा तथैव च अतः पि
तुर्वचः कार्यमावाभ्यामतिपन्नतः पितुर्वचनमुल्लंघ्य स्वतंत्रो यस्तु वर्त्तते स जीवन्नेव मृतको देहांते नि
रयं व्रजेत् तस्माद्राज्यं प्रशाधि त्वं वयं दंडकपालकाः भरतस्त्वब्रवीद्रामं कामुको मूढधीः पिता स्त्रीजि
तो भ्रांतहृदय उन्मत्तो यदि वक्ष्यति तत्सत्यमिति न ग्राह्यं भ्रांतवाक्यं यथा सुधीः श्रीराम उवाच न स्त्री
जितः पिता ब्रूयात् न कामी नैव मूढधीः पूर्वं प्रतिश्रुतं तस्मै सत्यवादी ददौ भयात् असत्याद्भीतिरस्ति
कामहती नरकादपि करोमीत्यहमप्येतत्सत्यं तस्यै प्रतिश्रुतं कथं वाक्यमहं कुर्याम सत्यं राघवो पि सन्

स्व
कौपरिस्वंचिविस्पपुनः पुनः संपरिषस्वजे विभुः ॥ अथ ता मातरः सर्वाः सर्वाः समाजग्मु[illegible]राध्विताः ॥ रा
घवं दृष्टुं कामा स्नातः पार्श्वेगोर्यया जनाः ॥ रामः स्वमृ तरं वीक्ष्य दुःखमुत्पाद्य पादयेः ॥ ववंदे साश्रुपूर्णमा
लिंग्या तां च दुःखिता ॥ इतरा मातुश्च तथा नत्वा जननी रघुनंदनः ॥ ततः समागतं दृष्ट्वा वसिष्ठं रघुनंदनः ॥
साष्टांगं प्रणिपत्याह धन्योस्मीति पुनः पुनः ॥ यथार्हमुपवे[illegible]पा[illegible]हृसा विनिवरघूद्वहः ॥ पिता मे कुशाली किं
वा मां किमाह तिदुःखितः ॥ वसिष्ठस्तमुवा[illegible]तिर घुनंदनः ॥ त्वद्वियोगाधितप्तात्मा त्वामेव परिचिंत
यन् ॥ रामरामेति सीतेति लक्ष्मणेति ममार ह ॥ श्रुत्वात्कर्णसमृत्ला कंगुरोर्वचनं मंजसा ॥ हा हतोस्मीतिप
ति तो रुदन् रामः सलक्ष्मणः ॥ ततो नुरुरुदुः सर्वा मातरश्च तथापरे ॥ हा तात मां परित्यज्य क्व गतो सि घृ
४१ णाकरः ॥ अनाथो स्मि महाबाहो मां को वा लालयेदितः ॥ सीता च लक्ष्मणश्चैव विलेपतु रतो नृशं ॥ वसिष्ठः शां
तवचनैः शमयामास तंस्तु च ॥ ततो मंदाकिनीं गत्वा स्नात्वा ते वीतकल्मषाः ॥ राजेंद्रं तत्र सर्वे तज्जल रा० ४१
कांक्षिणे ॥ पिंडान्निर्वापयामास रामो लक्ष्मणसंयुतः ॥ इंगुदीफलपिण्याकरचितान् समधुप्लुतान् ॥ वयं
प [illegible] दत्ताः पितरस्तद्दत्ता स्मृतिनोदिताः ॥ इति दुःखाश्रुपूर्णाक्षो पुनः स्नात्वा गृहं ययौ ॥ सर्वे रुदित्वा सुचिरं
स्नात्वा जग्मुस्तदाश्रमं ॥ तस्मिंस्तु दिवसे सर्वे उपवासं प्रचक्रिरे ॥ ततः परे द्युर्विमले स्नात्वा मंदाकिनी

द्धर्षिमंडलं ॥ कुत्रास्ते सीतया सार्द्धं लक्ष्मणेन रघूत्तमः ॥ ऊचुरग्रे गिरेः पश्चाद्गंगाया उत्तरे तटे ॥ विविक्ते रामस
दनं रम्यं काननमंडितं ॥ सफलै राम्रपनसैः कदलीखंडसंवृतं ॥ चंपकैः कोविदारैश्च पुन्नागैः बकुलैस्त
थाः ॥ एवं दर्शितमार्गोऽसौ मुनिभिर्निरतो गतः ॥ हर्षाद्ययौ रघुश्रेष्ठश्च नवनेमंविशासदं ॥ ददर्शाद्रौ इति
न्नासुरं स्तुत्वं रामस्याश्रमं मुनिवृंदसेवितं ॥ वृक्षाग्रसंलग्नसुवल्कलाजिनं रामाभिरामं भरतः सानुजः ॥
इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अयोध्याकांडे अष्टमोध्यायः ॥ ८ ॥ अथ गत्वाश्रमपदं समीपं भरतो मुदा सी
तारामपदैर्युक्तं पवित्रमतिशोभनं ॥ स तत्र वज्रांकुशवारिजं कुंभध्वजादिचिह्नानि पदानि सर्वतः ददर्
श रामस्य भुवोति मंगलान्यचेष्टयत्पादरजःसु सानुजः ॥ अहो सुधन्योहमम् निरामपदारविंदांकि
तभूतलानि पश्यामि यत्पादरजो विमृग्यं ब्रह्मादिदेवैः श्रुतिभिश्च नित्यं ॥ इत्यद्भुतप्रेमरसप्लुताशयो
विगाढचेता रघुनाथभावने ॥ आनंदजाश्रुस्नपितस्तनांतरः सनैर्ययौ आश्रमसंनिधिं हरेः ॥ स तत्र दृ
ष्ट्वा रघुनाथमास्थितं दूर्वादलश्यामलमायतेक्षणं ॥ जटाकिरीटं नववल्कलांबरं प्रसन्नवक्त्रं तरु
णारुणद्युतिं ॥ विनोदयंतं जनकात्मजां तदा सौमित्रिणा सेवितपादपंकजं ॥ तदाभिदुद्राव रघूत्तमं शुचा
तत्पादयुग्मं च वराभ्वितो ग्रहीत ॥ रामस्तमाकृष्य सुदीर्घबाहुर्दोर्भ्यां परिष्वज्य सिषिंचिनेत्रजैः जलैरंगा
णि ॥

तेमानसः त्रातुमर्हसिमां देवशुद्धोवाप्युद्धमेवच समराजेनकिंस्वामिन् रामेतिष्ठतिराजनि किंकरोहंमुनिश्रेष्ठ
रामचंद्रस्यशाश्वतः अतोगत्वामुनिश्रेष्ठरामस्यचरणांतिके पतित्वाराज्यसंभारान् समर्प्यात्रैवराघवं अ
निषेव्यवसिष्ठाद्यैःपौरजानपदैःसह नेष्येयोध्यांरमानाथंदासोसेवेतिनीचवत् इत्युदीरितमाकर्ण्यभरत
स्यवचोमुनिः आलिंग्यमूर्ध्न्यवघ्रायपशंससविस्मयः वत्सज्ञातंपुरैवेतत्तन्विघ्नंज्ञानचक्षुषा मामुचस्व
त्वंपरोननः श्रीरामेलक्ष्मणादपि आतिथ्यंकर्तुमिच्छामिसैन्यस्यतवानघ अद्यभुक्त्वाससैन्यस्त्वंश्वोगंतारा
मसन्निधं यथाज्ञापयतित्वंवांस्तथेतिभरतोब्रवीत् भरद्वाजस्तपःस्पृष्टामौनीहोमगृहेस्थितः दध्यौका
मदुघंकामवर्षिणींकामदांमुनिः ॥आगतास्मिरणादेवततःकामानपूरयत्॥
ससज्जत्कामधुक्सर्वंयथाकाममथालौकिकं भरतस्यससैन्यस्ययद्येष्टंचमनोरथं तथाववर्षसकलं ४०
तत्प्राप्तसबैसैनिकाः वसिष्ठपूजयित्वाग्रेशास्त्रदृष्टेनकर्मणा पश्चात्ससैन्यंभरतंतर्पयामासयोगिराट् उ
षित्वादिनमेकंतेआश्रमेस्वर्गसन्निभे आमंत्र्यात्मपुनःप्रातर्भारद्वाजंमहाभुजः भरतस्तत्कृतानुज्ञः प्रय
यौरामसन्निधिं चित्रकूटमनुप्राप्यदूरेसंस्थाप्यसैनिकान् रामंसंदर्शनाकांक्षीप्रययौभरतस्वयं शत्रु
घ्नेनसुमंत्रेणगुहेनचपरंतपः तपस्विमंडितंसर्वं विचिन्वानोम्यवर्त्तयत् सदृष्ट्वाराममुवनमय

नमस्कृत्याप्ययौप्र
द्योनसंदर्शनोत्सु
भारद्वाजकृतानुज्ञो
शिष्टाद्यैः समन्वितः

नस्यमपिहृदीधीः अहंरामस्यदासायेतेषांदासस्यकिंकरः यदित्यांसफलंजन्ममममनूपान्नसंशयः
भ्रातातिनास्तियदितत्कथयस्वमाखिलं यत्रतिष्ठतिनतत्राहंगच्छाम्यानेतुमंजसा गुहस्तंसुहृद्दूयंतात्वास्ति
हृमथाब्रवीत् देवत्वमेवधन्योसियस्यतेनतिरीदृशी रामेराजीवपत्राक्षेसीतायांलक्ष्मणेतथा चित्रकू
टाद्रिनिकटेमंदाकिन्याविदूरतः मुनीनामाश्रमपदेरामस्तिष्ठतिसानुजः जानक्यासहितानंदात्सुखमा
स्तेकिलप्रभुः तत्रगच्छामहेशीघ्रंगंगांतर्तुमिहार्हसि इत्युक्त्वात्वरितंगत्वानावःपंचशतानिहृ समानयत्स
सैन्यस्यतेतुगंगांमहानदी स्वयमेवातिनायैकांराजनावंगुहस्तदा आरोप्यभरतंतत्रशत्रुघ्नंराममात
रं वसिष्ठंचतथान्यत्रकैकेयींचान्ययोषितः तीर्त्वागंगांययौशीघ्रंभरद्वाजाश्रमंप्रति दूरेस्थाप्यमहासैन्यं
भरतःसानुजोययौ आश्रमेमुनिमासीनंज्वलंतमिवपावकं दृष्ट्वाननामभरतःसाष्टांगमतिभक्तितः
ज्ञात्वादशरथिंप्रीत्यापूजयामासमौनिराट् पप्रच्छकुशलंदृष्ट्वाजटावल्कलधारिणं राज्यंप्रशासतस्तेद्यकि
मेतद्वल्कलादिकं आगतोसिकिमर्थंत्वंविपिनंमुनिसेविते भरद्वाजवचःश्रुत्वाभरतःसाश्रुलोचनः सर्वंजा
नासिभगवन्सर्वभूताशयस्थितः तथापिपृच्छसेकिंचित्तवानुग्रहएवमे कैकेय्यायत्कृतंकर्मरामराज्यविघा
तनं वनवासादिकंवापिनजानामिकिंचन भवत्पादयुगंमेद्यप्रमाणंमुनिसत्तम इत्युक्त्वापादयुगलंमुनेःस्पृष्ट्वा

तःसर्वतोदिशः इतिसर्वान्समादिश्यगुहोभरतमागतः उपायनानिसंगृह्यविविधानिवहूनिच प्र
ययौज्ञातिभिःसार्द्धंवहूभिर्विविधायुधैः निवेद्योपायनान्यग्रेभरतस्यसमंततः दृष्ट्वाभरतमासीनंसा
नुजंसहमंत्रिभिः चीरांबरंघनश्यामंजटामुकुटधारिणं राममेवानुशोचंतंरामरामेतिवादिनं ननाम
शिरसाभूमौगुहोहमितिचाब्रवीत् शीघ्रमुत्थाप्यभरतोगाढमालिंग्यसादरं पृष्ट्वानामयमव्यग्रःसखा
यमिदमब्रवीत् भ्रातस्त्वंराघवेणात्रसमेतःसमवस्थितः रामेणालिंगितःसार्द्रनयनेनामलात्मना
धन्योसिकृतकृत्योसियत्त्वयापरिभाषितः रामोराजीवपत्राक्षोलक्ष्मणेनचसीतया यत्ररामस्त्वया
दृष्टःस्तत्रमांनयसुव्रत सीतयासहितोयत्रसुप्तस्तद्दर्शयस्वमे त्वंरामस्यप्रियतमोनतिमानसिना
संस्मृत्यप गवान् इतिसंस्मृत्यरामंसाश्रुविलोचनः गुहेनसहितस्तत्रययौयत्ररामस्थितोनिशि ययौददर्शशयन
३५ स्थलंकुशसमावृतं सीताभरणसंलग्नंस्थानेविंदुभिरंचितं दुःखसंतप्तहृदयोभरतःपर्यदेवयत् अ
हो अतिसुकुमारीयासीताजनकनंदनी प्रासादेरत्नपर्यंकेकोमलास्तरणेशुभे रामेणसहिताशेतेसाकथं ३५
कुशसंस्तरे सीतारामेसहितादुःखेनममदोषतः धिग्मांजातोसिकैकेय्यांपापराशिसमोमतः मन्नि
मित्तमिदंक्लेशंरामस्यपरमात्मनः अहोतिसफलंजन्मलक्ष्मणस्यमहात्मनः राममेवसदान्वेतिव

सन्निभामभिज्ञाद्विभुः तत्रासनेसमासीनस्वतुसुखस्वापरः आनीयभरतंततत्र उपवेश्यसहानुजं अब्रवीद्वचनं
देशकालोचितमरिंदमं वत्सराज्येनिषिद्धपामस्त्वामद्यपितृशासनात्कैकेय्यायाचितराज्यंत्वदर्थेपुरुषर्षभ सत्य
संधोदशरथःप्रतिज्ञायददौकिल अभिषिक्तोनवत्त्वद्यमुनिभिर्मंत्रपूर्वकं तछ्रुत्वाभरतोप्याह नममराज्येन
किंमुने रामोराजाधिराजस्त्ववयंतस्यैवकिंकराः सुप्रभातेगमिष्यामिरामंसमानेतुमंजसा अहंसूर्यंमातरस्त्वकैकेयी
राक्षसीविना हनिष्याम्यधुनैवाहंकैकेयीमातृगंधिनी किंतुमांनोरघुश्रेष्ठःस्त्रीहंतारंसहिष्यति ततःस्वभूते
गतागतिपादचारेणदंडकान् शत्रुघ्नसहितस्तूर्णंयूयंगच्छतुवानवा रामोयथावनंयातस्तथाहंवल्कलांबरः
फलमूलकृताहारःशत्रुघ्नसहितःमुने भूमिशायीजटाधारीयावद्रामोनिवर्त्तते इतिनिश्चित्यभरतस्तत्रूली
सेवावृतस्थिवान् साधुसाध्वितितंसर्वेप्राशंसन्सुमुदान्विताः ततःप्रभातेभरतंगच्छंतंसर्वसैनिकाः अनज
ग्मुः सुमंत्रेणनोदिताःसाश्वकुंजराः कौशल्याद्याराजदारावसिष्ठप्रमुखाद्विजा छादयंतोनुवंसर्वेपृष्ठतःपा
र्तिमतः शृंगवेरपुरंगत्वागंगाकूलेसमंततः उवाससमहतीसेनाशत्रुघ्नपरिचोदिताः आगतंभरतंश्रु
त्वागुहःशंकितमानसः महत्यासेनयासार्द्धमागतोभरतःकिल पापंकर्तुंनचायातिरामस्यविदितात्मनः
गत्वातद्हृदयंज्ञेयंयदिशुद्धस्तरिष्यति गंगांनोचेत्समाकृष्यनावतिष्ठंतुसायुधाः ज्ञातयोमेसमायत्तःपश्यं

त्ययस्तव देहीप्राक्तनदेहोत्थकर्मणा देहवान्पुनः तेह्नोस्येन वपुनरेवं देहः सदात्मनः यथा त्यजति वै
जीर्णवासो गृह्णातिनूतनं तथा जीर्णं परित्यज्य देहीदेहं पुनर्नवं भजत्येव सदा तत्र शोकस्यावसरः कुतः
आत्मा न म्रियते नैव जायते वर्द्धते न च षड्भावरहितोनंतः सत्यप्रज्ञानविग्रहः आनंदरूपो बुद्ध्यादिसं
गीलय विवर्जितः एक एव परो ह्यात्मा ह्यद्वितीयः समः स्थिरः इत्यात्मानं दृढं ज्ञात्वा त्यक्त्वा शोकं कुरु क्रि
यां तैलद्रोण्याः पितुर्देहं उद्धृत्य सचिवैः सह हस्पाकुरुयथान्याय्यं अस्माभिः रघुनंदनः इति संबोधि
तः साक्षाद्गुरुणा भरतस्तदा विसृज्याज्ञानजं शोकं चक्रे सविधि[illegible]यज्ञोपसहस्रशः उद्दिश्य पितरं
तत्र ब्राह्मणेभ्यो धनं बहु ददौ गवां सहस्राणि ग्रामान्रत्नांबराणि च वसिष्ठेन सह भ्राता मंत्रिभिः परिवा
रितः तथापि न सुखं लेभे भरतः सानुजः सदा अवसत्स्वगृहे तत्र राममेवानुचिंतयन् एवं क्रियां पराकृ
२४ त्वा मुक्तोसौ पितृकारणात् ततो गृहं समागत्य सोपाध्यायः सहानुजः रामेऽरण्यं प्रयाते सह जनकसुता २४
लक्ष्माणाभ्यां सुघोरं मातामे राज्ञसी वप्र[illegible]हति हृदयं दर्शनाद्देवसद्यः गच्छाम्यरण्यमद्य स्थिरमतिरखि
ले लं दूरतोपास्य राज्यं रामं सीतासमेतं स्मितरुचिरमुखं नित्यमेवानुसेवे ॥ इति श्रीमदध्यात्मरामायणे उ
मामहेश्वरसंवादे सप्तमोऽध्यायः ॥ ७ ॥ वसिष्ठो मुनिभिः सार्द्धं मंत्रिभिः पौरवासिभिः राजसभां देवसमा

क्रियां गुरुणा ...
रेणापितृतीर्थेपि
धिः संस्कृत्य सपितु
र्देहं विधि दृष्टेन कर्म
णा एकादशेह्नि
पोहं ब्राह्मणान् वेद
पारगान् भोजयामा
स विधिवद् ६

षा सएवं नरतो वीक्ष्य विलपंतीं भृशं शुचा पादौ गृहीत्वा प्राहेदं शृणु मातर्वचो मम कैकेय्यायत्कृतं कर्मरामस्य
ज्याभिषेचने अन्यद्वा यदि जानामि सा मया चोदिता यदि पापं मे स्युस्तदा मातर्ब्रह्महत्याशतोद्भवं हत्वा वसिष्ठं
खड्गेन यद्धत्पापास्म भवितं भूयात्तत्पापमखिलं मम जानामि यद्यपि इत्येवं शपथं कृत्वा रुरोद भरतस्तदा कौश
ल्या तमथालिंग्य पुत्र जानामि मा शुच एतस्मिन्नंतरे श्रुत्वा भरतस्य समागतं वसिष्ठो मंत्रिभिः सार्द्धं प्रययौ राममं
दिरं रुदंतं भरतं दृष्ट्वा वसिष्ठः प्राह सादरं वृद्धो राजा दशरथो ज्ञानी सत्यपराक्रमः भुक्त्वा मर्त्यसुखं सर्वं इष्ट्वा वि दे
पुलदक्षिणैः अश्वमेधादिभिर्यज्ञैर्लब्ध्वा रामं हरिं सुतं अंते जगाम त्रिदिवं देवेंद्रार्द्धासनं प्रभुः त्वं शोचसि कृपैव त्वं
अशोच्यं मोक्षभाजनं आत्मा नित्योऽव्ययः शुद्धो जन्मनाशादिवर्जितः शरीरं जडमत्यर्थमपवित्रं विनश्वरं
विचार्यमाणे शोकस्य नावकाशः कथंचन पिता वा तनयो वापि यदि मृत्योर्वशं गतः मूढास्तमनुशोचंति स्वा
त्मताडनपूर्वकं निःसारे खलु संसारे वियोगो ज्ञानिनां यदा भवेद्वैराग्यहेतुस्त्वं शांतिसौख्यं तनोति च जन्मवानस्य
दिलोकेस्मिन्नृतर्हि मृत्युरव्ययात् तस्मादपरिहार्योयं रक्षतु जन्मवतां सदा स्वकर्मवशतः सर्वजंतूनां प्रभवा
प्ययौ विजानन्नपि विद्वान् कः कथं शोचसि बांधवान् ब्रह्मांडकोट्यो नष्टाः सृष्टयो बहुशो गताः शुष्यंति सा
गराः सर्वे का वास्था क्षणजीविते चलपत्रांतलग्नांबुबिंदुवत् क्षणभंगुरा आयुस्त्यजत्यवेलायां कस्तत्र प्र

यत्तदाहं विश्रामाचरं राज्ञो तं द्विमे पूर्वं वरदे त पाचितं तादिदानीमेतयोरेकेन तोरिवत्वं राज्यं रामस्य
चैकेन मुनिव्रतमरंवेरितं ततः सत्यपरो राज ॥८॥ पुत्रा तवैवहि रामं संप्रेषयामास वनमेव पिता तव सीता
प्यनुगता रामं पातिव्रत्यमुपासिता सौभ्रात्रं ५८ वरं रामननुयातो पि लक्ष्मणः वनं गतेषु सर्वेषु राजा तातो नं
वचिंतयन् प्रलपन् राम रामेति ममार नृपस ५४ र्न इति मातुर्वचः श्रुत्वा वज्राहत इव द्रुमः पपात भूमौ निःसं
ज्ञस्तं दृष्ट्वा दुःखिता तदा कैकेयी पुनरप्याह वत्स ५५ शोकेन किं तव राज्यमहति संप्राप्ते दुःखस्यावसरः कुतः
इति ब्रुवंतिमालोक्य मातरं प्रदहन्निव असंभाष्या हि पापे मे घोरे त्वं नर्तृघातिनि पापे त्वद्गर्भजातो हं पाप
वानस्मि सांप्रतं अहमग्निं प्रवेक्ष्यामि विषं वा भक्षयाम्यहं खड्गेन वाथवात्मानं हत्वा यामि यमालयं भर्तृघा
तिनि दुष्टे त्वं कुंभिपाकं गमिष्यसि इति निर्भर्त्स्य कैकेयीं कौशल्याभवनं ययौ सापि तं भरतं दृष्ट्वा पुत्रशोकेन ठा
रोदद पादयोः पतितस्तस्या भरतो पि तदा रुदन् आलिंग्य भरतं साध्वी राममाता यशस्विनी कृशातिदीनव
दना साश्रुनेत्रेदमब्रवीत् पुत्र त्वयि गते दूरे एवं सर्वमभूदिदं उक्तो मात्रा श्रुतं सर्वं त्वपाते मातृचेष्टितं पुत्र
सभार्यो वनमेवं यातः सलक्ष्मणो मे रघुरामचंद्रः चीरांबरो बद्धजटाकलापः संत्यज्य मोदं दुःखसमुद्रमग्नां
हा राम हा मे रघुवंशनाथ जातो सि मे त्वं परतः परात्मा तथापि दुःखं न जहाति मां वै विधिर्बलीयानिति निर्मनी

नहिनोपत्र २ ६

तान्नवनं राजलक्ष्मीविवर्जितं ॥ अपश्यत् कैकेयीतत्र शोकाभिवासनेस्थितां ॥ नानामणिशिरसापादौमातुर्नित्यस-
स्थितः ॥ आगतं भरतं दृष्ट्वा कैकेयी प्रेमसंभ्रमात् ॥ उत्थायालिंग्य स्वनसा स्वांकमारो प्य संस्थिता ॥ मूर्द्ध्न्यवघ्राय
पप्रच्छ कुशलं स्वकुलस्य सा ॥ पिता मे कुशली भ्राता माता वा शत्रुघ्नलक्ष्मण ॥ दृष्ट्वा त्वमद्य कुशली मया दृष्टोसि पुत्र
क ॥ इति पृष्टः स भरतो मात्रा चिंताकुलेंद्रियः ॥ दूयमानेन मनसा मातरं समपृच्छत ॥ मातः पिता मे कुत्रास्ते ए-
का त्वमिह संस्थिता ॥ त्वया विना न मे तातः कदाचिद् दृष्टसंस्थितः ॥ इदानीं दृश्यते नैव कुत्र तिष्ठति मे वद ॥ अदर्श-
नं पितुर्मेद्य जनयेद् दुःखं च जायते ॥ पाह कैकेयी पुत्रं किं दुःखेन तेवानघ ॥ या गतिर्मर्त्यशीलानां नाम समेधादिया-
ज्विनां ॥ तां गतिं गतवान् यापिता ते पितृवत्सल ॥ तच्छ्रुत्वा निपपातोर्व्यां भरतः शोकविह्वलः ॥ हा तात क्व गतोसि
त्वं त्यक्त्वा मां वृजिनार्णवे ॥ असमर्प्यैव रामाय राज्ये मां क्व गतोसि नो ॥ इति विह्वलं तं पुत्रं पतितं मुक्तमूर्द्धजं ॥ उत्थाप्य
मृज्य नयने कैकेयी पुत्रमब्रवीत् ॥ समाश्वसिहि चिन्तं ते सर्वं संपादितं मया ॥ तामाह भरतस्तातो म्रियमाणः किमब्र-
वीत् ॥ तमाह कैकेयी देवी भरतं भयवर्जिता ॥ हा राम मसीतेति लक्ष्मणेति पुनः पुनः ॥ विलपन्नेव सुचिरं देहं त्य-
क्त्वा दिवं ययौ ॥ इति मातृवचः श्रुत्वा निमग्नः शोकसागरे ॥ तामाह भरतो देवं रामः सन्निहितो न किं ॥ तदानीं ल-
क्ष्मणो वापि सीता वा कुत्र ते गताः ॥ कैकेयीउवाच नांबु ॥ रामस्य यौवराज्यार्थं पित्रा ते संभ्रमः कृतः ॥ तव राज्यप्रदाना

घनं पतितौ नौ सुतो यत्र न पतत्राविलंबयत् ततो नीतौ सुतो यत्र मया[illegible]तौ वृद्धदंपती स्पृष्ट्वा सुतं तौ हस्ता
स्यांवद्दुःखोथ विलेपतुः हाहेति क्रंदमानौ तौ पुत्र पुत्रेत्यवोचतां जलं देहीति पुत्रेति किमर्थं न ददास्यलं ततो
मामूचतुः शीघ्रं चितां रचय नृपते मया तदैव रचिता चितिस्तत्र निवेशिता त्रयस्तत्राग्निरुत्सृष्टो दग्धास्ते
त्रिदिवं ययुः तत्र वृद्धः पिता प्राह त्वमप्येवं भविष्यसि पुत्रशोकेन मरणं प्राप्स्यसे वचनान्मम सइदानी
मप्राप्तः शापकालोऽनिवारितः इत्युक्त्वा विलप्य राजा शोकसमाकुलः हा राम पुत्र हा सीते हा लक्ष्म
णगुणान्वितः त्वद्वियोगाद्दुःखं प्राप्तो मृत्युं कैकेयि संजवं वदन्नेवं दशरथो प्राणांस्त्यक्त्वा दिवं गतः कौशल्या
च सुमित्रा च तथान्या राजयोषितः चक्रुश्च विलेपुश्च उरस्ताडनपूर्वकं वसिष्ठः प्रययौ तत्र प्रातः मंत्रिभिः
३९ वृतः तैलद्रोण्यां दशरथं क्षिप्त्वा दूतानथाब्रवीत् गच्छत त्वरितं साश्वा युधाजिन्नगरं प्रति तत्रास्ते भरतः ३९
श्रीमान् शत्रुघ्नसहितः प्रभुः उच्यतां भरतं शीघ्रमागच्छतु ममाज्ञया अयोध्यां प्रति राजानं कैकेयी चाभिषि
ञ्चतु इत्युक्तास्त्वरितं दूता गत्वा भरतमातुलं युधाजितं प्रणम्योचुर्भरतं सानुजं प्रति वसिष्ठस्त्वब्रवीत्तात
न् भरतः सानुजः प्रभो शीघ्रमागच्छतु पुरीमयोध्यामविचारयन् इत्याकर्ण्याथ भरतस्त्वरितं नयविह्वलः
याययौ गुरुणादिष्टः सह दूतैस्तु सानुजः रात्रौ वा राघवस्यापि दुःस्वप्नं किंचिदुपस्थितं इति चिंतापरो मार्गे
चिंतयन्नगरं ययौ नगरं भ्रष्टलक्ष्मीकं जनसंबाधवर्जितं [illegible] दृष्ट्वा चिंतापरोऽभवत्

तानयाविद्धस्त्वातुमर्हसिमांमुने इत्युक्तापादयोस्तस्यपतितोगद्गदाक्षरैः तदामामाहसमुनिर्माने
धिर्नृपसत्तम ब्रह्महत्यास्पृशेन्नात्वांवैश्योहंतपसिस्थितः पितरौमांप्रतीक्षेतेक्षुत्तृड्भ्यांपरिपीडितौ तयो
स्त्वमुदकंदेहिशीघ्रमेवाविचारयन् नोचेत्त्वांभस्मसातकुर्यात्पितामेयदिकुप्यति जलंदत्वातुतौनत्वाहृतंसर्व
निवेदय शल्यमुद्धरमेदेहात्प्राणैस्तस्यक्षयामिपीडितः इत्युक्तोमुनिनाशीघ्रंवाणमुत्पाद्यदेहतः सजलंकलशंद्धृत्वा
गतोहंयत्रदंपती अंधौतौवृद्धावंधदृशौस्तःपिपासितयानिशि नायातिसलिलंगृह्यपुत्रःकिंचात्रकारणं अस्मन्नागति
कोवृद्धौशोचौतृड्परिपीडितौ अथवाध्युपेक्षतेकिंवातत्रिमानावयोर्हिसः इतिचिंताविचारौतौमत्पादन्यासजंध्वनि
श्रुत्वाप्राहपितापुत्रकिंविलंबःकृतस्त्वया देह्यावयोःसुपानीयं[illegible]पिबत्वमपिपुत्रक इत्येवंल्पतोनीत्यासकौ
शोमगमसौमैनैः पादयोःप्रणिपत्याहमब्रुवंविनयान्वितः नाहंपुत्रस्त्वयोध्यायाराजादशरथोस्म्यहं पापोहं
मृगयासक्तोरात्रौमृगविहिंसकः जलावतीरादूरेहंस्थित्वाजलगतंध्वनिं श्रुत्वाहंशब्दभेदित्वादेकंवाणमप्यो
त्यजं हतोस्मीतिध्वनिंश्रुत्वाजयात्तत्राहमागतः घटाविकीर्यपतितंदृष्ट्वाहंमुनिदारकं भीतोगृहीत्वातत्पादौ
रक्षरक्षेतिचाब्रुवं माभैषीरितिमांप्राहब्रह्महत्यानयंनते मत्पित्रोःसलिलंदत्वात्वनत्वाप्रार्थयजीवितं इत्युक्तो
मुनिनातेनआगतोमुनिहिंसकः रक्षतांमांदयायुक्तौयुवांतच्छरणागतं इतिश्रुत्वासदुःखातौविलप्यबहुश।

ततःसाकृपरीताह्रीनावमारुह्यगुरुस्तदा यावद्गंगासमुत्तीर्यगतास्तावदहंस्थितः ततोदुःखेन[illegible]गत
तापुनरेवाहमागतः ततोरुदतीकौशल्याराजानमिदमब्रवीत कैकेय्याःप्रियनाप्ययिप्रसन्नेतोदत्त
वान्वरं त्वंराज्यंदेहितस्यैवमसुतःकिंविवासितः कृत्वात्वमेवतत्सर्वमिदानींकिंतुरोदिषु कौस
ल्यावचनंश्रुत्वाहतेस्पृष्टइवाग्निना किंवदिष्यसिमांत्वंदेवनवितव्यंम्हितत्तथा तथापिदुःखितंमांत्वंने
वंवक्तुमर्हसि त्वयादिष्टंहिफलितंममसंतापकारकं पुनश्चोकाकुपूर्णाक्षःकौशल्यामिदमब्रवीत
त्रि दुःखेनम्रियमाणंमांकिंपुनर्दुःखयस्यलं इदानींसर्वमेवमेप्राणाउत्क्रमिष्यंतिनिश्चितं [illegible]
[illegible] शप्तोहंबाल्यभावेनकेनचिन्मुनिनापुरा
३५ पुराहंयौवनोद्रिक्तश्चापबाणधरोनिशि आचरन्मृगयासक्तोनद्यास्तीरेमहावने तत्राहंसमयेरात्रौ ३५
मुनिःकश्चित्तृषार्दितः पिपासार्दितयोःपित्रोर्जलंमानेतुमुद्यतः अपूरयज्जलंकुंभंतदाशब्दोभवन्महा
न् गजःपिबतिपानीयमितिमत्वामहानिशि बाणंधनुषिसंधायशब्दवेधिनमाक्षिपं हाहतोस्मीति
तत्रान्तराशब्दोमानुषस्त्वकः कस्यापिनकृतोदोषोमयाकेनहतोविधे प्रतीक्षतेमांमाताचपिताचजलं
कांक्षया ततश्रुत्वाजयसंत्रस्तोततोहंपौरुषेवदः शनैर्गत्वापतत्पार्श्वेस्वामिन्दयार्योस्म्यहं अजान

॥देवैर्मुनींद्रैः सहितोपुरास्ते स्वर्गे यथा देवपतिः सराम॥ इति श्रीमदध्यात्मरामायणे ऽयोध्याकांडे षष्ठो
ऽध्यायः॥६॥ सुमित्रो ऽपि तदायोध्यां दिनांते प्रविवेश ह वस्त्रेणामुखमाच्छाद्य बाष्पाकुलितलोचनः
बहिरेव रथं स्थाप्य राजानं द्रष्टुमाययौ जयशब्देन राजानं स्तुत्वा तं प्रणनाम च ततो राजा नमंतं तु सु
मंत्रं विह्वलो ऽब्रवीत् सुमंत्र रामः कुत्रास्ते सीतया लक्ष्मणेन च कुत्र त्यक्तस्त्वया रामः किं मां पापिनम
ब्रवीत् सीता वा लक्ष्मणो वापि निर्दयं मां किमब्रवीत् हा राम हा गुणनिधे हा सीते प्रियवादिनि दुःखार्ण
वे निमग्नं म्रियमाणं न पश्यसि विलप्यैवं चिरं राजा निमग्नो दुःखसागरे एवं मंत्री रुदंतं तं प्रांजलि
र्वाक्यमब्रवीत् रामः सीता च सौमित्रिर्मया नीता रथेन ते शृंगवेरपुराभ्यासे गंगाकूले व्यवस्थि
ताः गुहेन किंचिदानीतं फलमूलादिकं च यत् स्पृष्ट्वा हस्तेन संप्रीत्या नाग्रहीद्विससर्ज तत् वटक्षीरं स
मानाय्य गुहेन रघुनंदनः जटामुकुटमाबध्य मामाह रघुनंदनः सुमंत्र ब्रूहि राजानं शोकस्ते ऽस्तु न म तु
त्कृते साकेतादधिकं सौख्यं विपिने नो भविष्यति मातुर्मे वचनं ब्रूहि शोकं त्यज मम त्कृते आश्वास
य तु राजानं वृद्धं शोकपरिप्लुतं सीता चाश्रुपरीताक्षी मामाह नृपसत्तम दुःखगद्गदया वाचा रामं किं
चिदवेक्षती साष्टांगं प्रणिपातं मे ब्रूहि श्वश्र्वोः पादांबुजे इति प्ररुदती सीता गता किंचिदवाङ्मुखी ते
[illegible]

महता रवतः ॥ वध्वा पतिकरं सम्यकूतामनायोपचक्रमे ॥ गछंतं वालिनं तारा गृहीत्वा निषिषेध तं ॥ न गंतव्यं
त्वयेदानीं शंकामि तीव्रजायते ॥ इदानीमेव ते भग्नः पुनरायाति सत्वरः ॥ सहायो बलवान् तस्य कश्चिन्नूनं
समागतः ॥ कालीतामाह देवि त्वं शंकां त्यक्त्वा तु तद्गता ॥ प्रियेयकरं परित्यज्य गच्छाम्यहं तं रिपुं ॥ हत्वाशीघ्रं स
मायास्ये सहायस्तस्य कोभवेत् ॥ संहायी यदि सुग्रीवस्ततो हत्वो भयं क्षणात् ॥ आयामि मा शुचः शूरः कथं
तिरस्कृतः रिपुं ॥ ज्ञात्वाप्याहूयमानं हि हत्वायास्यामि सुंदरि ॥ तारोवाच ॥ मत्तोन्यत् शृणु राजेंद्र श्रुत्वा
कुरु यथोचितं ॥ आह मां मे अंगदः पुत्रो मृगयायां श्रुतं वचः ॥ अयोध्याधिपतिः श्रीमान् रामो दाशरथिः किल
॥ लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह ॥ आगतो दंडकारण्ये तत्रासीता हृता किल ॥ रावणेन स दुष्टात्मा
मार्गमाणोथ जानकीं ॥ आगतो ऋष्यमूकाद्रिं सुग्रीवेण समागतः ॥ चकार तेन सुग्रीवः सख्यं चानलसाक्षि
कं ॥ प्रतिज्ञां कृतवान् रामः सुग्रीवाय सलक्ष्मणः ॥ वालिनं समरे हत्वा राजानं त्वां करोम्यहं ॥ इति निश्चित्य ता
वुभौ ॥ निश्चयं शृणु मद्वचः ॥ इदानीमेव ते भग्नः कथं पुनरुपागतः ॥ अतस्त्वं सर्वथा वैरं त्यक्त्वा सुग्रीवमा
नय ॥ यौवराज्येभिषिच्याशु रामं त्वं शरणं व्रज ॥ पाहि मामंगदं राज्यं कुलं च हरिपुंगवान् ॥ अन्यच्च शृणु राजेंद्र
द्र महत्कारणमुच्यते ॥ मातंगाद्रिसमीपे तु स्थापितं दुंदुभेः शिरः ॥ अंगुष्ठाग्रेण रामेण क्षिप्तं तद् दशयोजनं ॥

त्य

सप्रतापान्विनिर्यासुमोदतेराघवस्तदा ॥ इत्युक्त्वाभ्युसुग्रीवी ताराया पादयोः प्रणिपत्य तं ॥ हत्वा व्यांच रणे
धृत्वा रोदनयविह्वला ॥ तामालिंग्य ततो वाली सस्नेहमिदमब्रवीत् ॥ स्त्री स्वभावाद्बिभेषि त्वं प्रिये नास्ति
भयं मम ॥ रामो यदि समायातो लक्ष्मणेन समं प्रभुः ॥ तदा रामेण सस्नेहो न विघ्यति न संशयः ॥ रामो
नारायणः साक्षादवतीर्णोऽखिलप्रभुः ॥ भूभारहरणार्थाय कृतं पूर्वं मया न घे ॥ स्वपक्षपरपक्षो वा नास्ति
तस्य परात्मनः ॥ अनेष्यामि गृहं सा चिन्न त्वं चरणौ बुधे ॥ नन्नतो नु नजस्य षभक्तिगम्यः परेश्वरः ॥ यदि
स्वयं समायाति सुग्रीवो हन्मि तं क्षणात् ॥ यद्युक्तं यौवराज्याय सुग्रीवस्याभिषेचनं ॥ कथमाहूयमानोऽहं
सुह्वाय रिपुणा प्रिये ॥ शूरोऽहं सर्वलोकानां संमतः शृणु लक्षणे ॥ भीतनीतमिदं वाक्यं कथं वाली वदेत
प्रिये ॥ तस्माच्छोकं परित्यज्य तिष्ठ सुंदरि वेश्मनि ॥ एवमाश्वास्य तां तारां शोचतीमश्रुलोचनां ॥ गतो वा
ली समुद्यक्तः सुग्रीवस्य वधाय सः ॥ दृष्ट्वा वालीन मायांतं सुग्रीवो वालिनं तथा ॥ रामं विलोकयन्नेव सु
ग्रीवो युयुधे युधि ॥ इत्येवं युध्यमानौ तौ दृष्ट्वा रामः प्रतापवान् ॥ बाणमादाय तूणीराद्दृढे धनुषि संदधे
॥ आरुष्य कर्णपर्यंतं तमदृश्यो रघूद्वहः ॥ निरीक्ष्य वालिनं सम्यक् लक्ष्यं तद्धृदये हरिः ॥ उत्ससर्ज
ग तं निसमं महावेगो महाबलः ॥ विभेद सत्वरो वक्षो वालिनः कंपयन्महीं ॥ उत्पपात महाशब्दं भुवस्स
भीमविक्रमः ॥ उत्पपात गले वक्तूर्यं श्यमालः मतंगवत् ॥
पृथिव्यां ता उपमस्स कलिं न सोऽपि तं तथा ॥ अरे वाली
सुग्रीवं सुग्रीवो ॥

६६ ६६

त्मासहदीकृतानांत्वत्पादसेवापरिनिश्चितानां त्वन्नामकीर्त्तनपरिहृतकल्मषाणांसीतासमेततवपादसंदर्शने रा
मत्वन्नाममहिमावर्ण्यतेकेनवाकथं यत्प्रभावादहंरामब्रह्मर्षित्वमवाप्तवान् अहंपुराकिरातैःसहवर्द्धितः
जन्ममात्रद्विजत्वंमेशूद्राचाररतःसदा शूद्रायांबहवःपुत्राउत्पन्नामेजितात्मनः ततश्चौरैश्चसंगम्यचौरोहमभ
वंपुरा धनुर्बाणधरोनित्यंजीवानामंतकोपमः एकदामुनयःसप्तदृष्टामहतिकानने सासेदांतमपापका
शांतोज्वलनार्कसमप्रभाः तानन्वधावंलोभेनतेषांसर्वपरिच्छदान् गृहीतुकामास्तत्राहंतिष्ठतिष्ठेतिचा
ब्रुवं दृष्ट्वामांमुनयःपृच्छन्किमायासिद्विजाधम अहंतानब्रुवंकिंचिदादातुंमुनिसत्तमाः पुत्रदारादयः
संतिबहवोमेबुभुक्षिताः तेषांसंरक्षणार्थायचरामिगिरिकानने ततोमामूचुरव्यग्राःपृच्छगत्वाकुटुंबकं यो
योमयाप्रतिदिनंक्रियतेपापसंचयः यूयंतद्भागिनःकिंवानेतिवेतिपृथक्पृथक् वयंत्वायास्यामहेयावदा
गमिष्यसिनिश्चयः तथेत्युक्त्वागृहंगत्वामुनिभिर्यदुदीरितं अपृच्छंपुत्रदारादीन्तैरुक्तोहंरघूत्तम
पापंतवैवतत्सर्वंवयंतुफलभागिनः तच्छ्रुत्वाजातनिर्वेदोविचार्यपुनरागमं मुनयोयत्रतिष्ठंति
[illegible]करुणापूर्णमानसाः मुनीनांदर्शनादेवशुद्धांतःकरणोनवं धनु[illegible]दीन्परित्यज्यदंडवत्पतितोस्म्य
हं रक्षध्वंमांमुनिश्रेष्ठागच्छंतंनिरयार्णवं इत्यग्रेपतितंदृष्ट्वामामूचुर्मु[illegible]सत्तमाः उत्तिष्ठोत्तिष्ठभद्रंते

सफला: सत्‌समागमा: उपदेशपात्महेतुस्त्वंकिंचित्तेनैवमोहसे परस्परंसमालोच्यदुरीतोपदिनाधमा:
उपेक्षएवसहतैस्तपापिशारणंगतः रक्षणीयः यनेनमोहयमार्गोपदेशतः इत्युक्तारामेतेनामव्यपला
दारसूपकं एकाग्रमनसाजपैवमेरेतिजपसर्वदा आगछामःपुनर्यावत्तावदुक्तंसदाजप इत्युक्तापि
ययुःसर्वेमुनयोदिव्यदर्शना अहंयथोपदिष्टंतैस्तथाकरवमंजसा जपन्नेकाग्रमनसावाह्यंविस्मृतवा
ति नहं एवंवहुतिथेकालेगतेनिश्चलरूपिणः सर्वसंगविहीनस्यवल्मीकोभूत्ममोपरि ततोयुगसहस्त्रांते
ऋषयःपुनरागमन्‌ मामूचुर्निःक्रमस्वेतितच्छ्रुत्वातूर्णमुथ्यितं वल्मीकान्निर्गतश्चाहंनीहारादिवभास्करः
ममाप्याहुर्मुनिगणा वाल्मीकिस्त्वंमुनीश्वरः वल्मीकात्संभवोयस्मात्द्वितीयंजन्मतेभवत्‌ इत्युक्त्वातेय
युर्दिव्यगतिंरघुकुलोत्तम अहंतेरामनाम्नश्चप्रभावादीदृशोभवं अद्यसाक्षात्प्रपश्यामिससीतंलक्ष्म
णेन[illegible]च रामंराजीवपत्राक्षंत्वंमुक्तोनात्रसंशयः आगछराम्नद्रंतेस्थलंवैदर्शयाम्यहं एव
मुक्त्वामुनिःश्रीमांल्लक्ष्मणेनसमन्वितः शिष्यैःपरिवृतोगत्वामध्यंपर्वतगंगयोः तत्रशालांसुविस्ती
र्णांकारयामाससंयतात्मा: प्राक्पश्चिमदक्षिणेदिक्षुशोभनंमंदिरत्रयं जानक्यासहितोरामोलक्ष्मणेनसम ३४
न्वितः तत्रदेवसदृशाश्चावसन्भवनोत्तमे वाल्मीकिनायत्रसुपूजितोयंरामःससीतःसहलक्ष्मणेन

राहृतः फलमूलैःसुमधुरैर्भोजयित्वाचलालितः राघवःप्रांजलिःप्राहवाल्मीकिंविनियान्वितः पितुरा
ज्ञांपुरस्कृत्यदंडकानागतावयं भवंतोयदिजानंतिकिंवक्ष्याम्यत्रकारणं यत्रमेसुखवासायभवेत्स्थानं
वदस्वतत् सीतयासहितःकालंकिंचिदत्रनयाम्यहं इत्युक्तोराघवेणासौमुनिःसस्मितमब्रवीत्
त्वमेवसर्वलोकानांनिवासस्थानमुत्तमं तवापिसर्वभूतानिनिवाससदनानिहि एवंसाधारणंस्था
नमुक्तंतेरघुनंदन सीतयासहितस्येतिविशेषंपृछतस्तव तद्वक्ष्यामिरघुश्रेष्ठयत्तेनियतिमंदिरं शांता
नांसमदृष्टीनामद्वेष्टॄणांचजंतुषु त्वामेवभजतांनित्यंहृदयंतेऽधिमंदिरं धर्माधर्मान्परित्यज्यत्वामेव
३३ भजतेऽनिशं सीतयासहतेरामतस्यहृत्सुखमंदिरं त्वन्मंत्रजापकोयस्तुत्वामेवशरणंगतः निर्द्वंद्वो
निस्पृहस्तस्यहृदयंतेसुमंदिरं निरहंकारिणःशांताःरागद्वेषविवर्जिताः समलोष्टाश्मकनकास्तेषांते
हृदयंगृहं त्वयिदत्तामनोबुद्धिर्यःसंतुष्टःसदाभवेत् त्वयिसंत्यक्तकर्मायस्तन्मनस्तेशुभंगृहं योन ३३
द्वेष्ट्यप्रियंप्राप्यनहृष्यति सर्वंमायेतिनिश्चित्यत्वांभजेत्तन्मनोगृहं षड्भावादिविकारान्योदेहेपश्यतिनात्म
नि क्षुत्तृट्सुखभयंदुःखंप्राणबुद्ध्योर्निरीक्षते संसारधर्मैर्निर्मुक्तःतस्यतेमानसंगृहं पश्यंतियेसर्व
गुहाशयस्थंत्वांचिद्घनंसत्यमनंतमेकं अलेपकंसर्वगतंवरेण्यंतेषांहृदब्जेसहसीतयावस निरंतरा
प्राप्य प्रियं

७

तच्छ्रुत्वास हसोत्थाय भरद्वाजो मुनीश्वरः गृहीत्वार्घ्यपाद्यं च रामसामीप्यमाययौ दृष्ट्वा रामं यथान्यायं पूजयित्वा सलक्ष्मणं आह मे परमं प्रीतिशालो ऽसौ राम राजीवलोचन आगच्छ पादरजसा पुनीहि रघुनंदन इत्युक्तो ऽटजमानीसीतया सह राघवो भक्त्या पुनः पूजयित्वा चकार आतिथ्यमुत्तमं अद्याहं तपसः पारं नो ऽस्मि तव संगमात् ज्ञातं राम तवोदंतं भूतं चागामिकं च यत् जानामि त्वां परात्मानं मायया कृतमानुषं यदर्थमवतीर्णो ऽसि प्रार्थितो ब्रह्मणा पुरा यदर्थं वनवासस्ते यत्करिष्यसि वै पुरः जानामि ज्ञानदृष्ट्याहं संततं त्वदुपासनात् इतः परं त्वां किं वक्ष्ये कृतार्थो ऽहं रघूत्तम यस्त्वां पश्यामि काकुत्स्थं पुरुषं प्रकृतेः परं राम स्तमभिवाद्याह सीता लक्ष्मणसंयुतः अनुग्राह्यास्त्वया ब्रह्मन् वयं क्षत्रियबांधवः इति संभाष्य तेनान्यमुषित्वा मुनिसन्निधौ प्रातरुत्थाय यमुनामुत्तीर्य मुनिदारकैः कृतप्लवेन मुनिना दृष्टमार्गेण राघवः प्रययौ चित्रकूटाद्रिं वाल्मीकेराश्रमं ततः गत्वा रामो ऽथ वाल्मीकेराश्रमं मुनिसंकुलं नानामृगद्विजाकीर्णं नित्यं पुष्पफलादिकं ततो दृष्ट्वा समासीनं वाल्मीकिं मुनिसत्तमं ननाम शिरसा रामो लक्ष्मणेन च सीतया दृष्ट्वा रामं रमानाथं वाल्मीकिर्लोकसुंदरं जानकीलक्ष्मणोपेतं जटामुकुटमंडितं कंदर्पसदृशाकारं कमनीयांबुजेक्षणं दृष्ट्वैव सहसोत्तस्थौ विस्मयानिमिषेक्षणः आलिंग्य परमानंदं रामं हर्षाश्रुलोचनः पूजयित्वा जगत्पूज्यं भक्त्यार्घ्यादिभिः

६

णं स्वामिन्नारुह्यतां नौकां सीतया लक्ष्मणेन च वाहयेज्ज्ञातिभिः सार्द्धमहमेव समाहितः तथेति राघ
वः सीतामारोप्य सुलक्षणां गुहस्य स्कन्धमालम्ब्य स्वयं चारुरुहेऽच्युतः आयुधादीन् समानीय लक्ष्म
णोप्यारुरोह च गुहस्तां वाहयामास ज्ञातिभिः सहितः स्वयं गंगामध्यगता गंगां प्रार्थयामास जानकी
देवि गंगे नमस्तेस्तु निवृत्ता वनवासतः रामेण सहिता हं त्वां लक्ष्मणेन च पूजयेत् सुरामांसोपहारैः
सुनानाबलिभिरादृता इत्युक्त्वा परं कूलं ते शनैरुत्तीर्य जग्मतुः गुहोपि राघवं प्राह गमिष्यामि त्वया सह
अनुज्ञां देहि राजेंद्र नो चेत्प्राणांस्त्यजाम्यहं श्रुत्वा नैषादवचनं श्रीरामस्तमथाब्रवीत् चतुर्दशसमाः स्थि
त्वा दंडके पुनरप्यहं आयास्याम्युदितं सत्यं नासत्यं राम भाषितं इत्युक्त्वालिंग्य तं भक्तं समाश्वास्य पुनः पु
नः निवर्त्तयामास गुहं सोपि कृच्छ्राद्ययौ गृहं तत्र मेध्यं मृगं हत्वा चेते त्रयः भुक्त्वा रक्षन्तले सुषुपुस्त्र
य मासे ततो निशां ततो रामस्तु वैदेह्या लक्ष्मणेन समन्वितः भरद्वाजाश्रमपदं गत्वा बहिरुपस्थितः
तत्रैकं बटुकं दृष्ट्वा रामः प्राह च हे बटो रामो दाशरथिः सीतालक्ष्मणाभ्यां समन्वितः आस्ते बहिर्वन
स्येतिरुच्यतां मुनिसन्निधौ तच्छ्रुत्वा सहसागत्वा पादयोः पतितो मुनेः स्वामिन् रामः समागत्य व
नाद्बहिरवस्थितः सभार्यः सानुजः श्रीमानाह मां देवसंनिभः भरद्वाजाय मुनये ज्ञापयस्व यथोदितं

गुहस्तपात्र स्थानं कंनममार्गीवल्के केका १६

वि

पत्वाद्भुत्वा

३२

णःप्राहसस्वेक्ष्मणशृणुवचोमम ॥ कःकस्यहेतुर्दुःखस्यकस्यहेतुःसुखस्यवा ॥ स्वपूर्वार्जितकर्मैवकारणंसु-
खदुःखयोः ॥ सुखस्यदुःखस्यनकोपिदातापरोददातीतिकुबुद्धिरेषा ॥ अहंकरोमीतिवृथाभि-
मानःस्वकर्मसूत्रग्रथितोहिलोकाः ॥ सुहृन्मित्रार्युदासीनद्वेष्यमध्यस्थबांधवाः ॥ स्वयमेवाचरन्कर्मणो
यंतत्तत्रनान्यथा ॥ सुखंवायदिवादुःखंस्वकर्मवशगोनरः ॥ यद्यद्यथागतंतत्तद्भुक्त्वास्वस्थमनाभवेत्
॥ नमेभोगागमेवांछानमेभोगविवर्जने ॥ आगच्छत्वथमागच्छत्वभोगवशगो भवेत् ॥ यस्मिन्देशेचका
लेचयस्माद्वायेनकेनवा ॥ कृतंशुभाशुभंकर्मभोज्यंतत्तत्रनान्यथा ॥ अलंहर्षविषादाभ्यांशुभाशुभफलो
८ दये ॥ विधात्राविहितंयद्यत्तदलंघ्यंसुरासुरैः ॥ सर्वदासुखदुःखाभ्यांनरःप्रत्यवरुध्यते ॥ शरीरंपुण्यपापा
भ्यामुत्पन्नंसुखदुःखवत् ॥ सुखस्यानंतरंदुःखंदुःखस्यानंतरंसुखं ॥ द्वयमेतद्धिजंतूनामलंघ्यंदिनरात्रिव
त् ॥ सुखमध्येस्थितंदुःखंदुःखमध्येस्थितं सुखं ॥ द्वयमन्योन्यसंयुक्तंप्रोच्यतेजलपंकवत् ॥ तस्माद्धै
र्येणविद्वांसइष्टानिष्टोपपत्तिषु ॥ नहृष्यंतिनमुह्यंतिसर्वंमायेतिभावनात् ॥ गुहलक्ष्मणयोरेवंभाषतोर्विमलं
नभः ॥ बभूवरामःसलिलंस्पृष्ट्वाप्रातःसमाहितः ॥ उवाचशीघ्रंसुदृढांनावमानयमेसखे ॥ आरुह्यपरपारे
वैगमिष्यामोयमाचिरं ॥ श्रुत्वारामस्यवचनंनिषादाधिपतिर्गुहः ॥ स्वयमेवदृढांनावमानीयशुभलक्ष

वि गुहस्तुथाप्यतंतूर्णंराघवःपरिषस्वजे संपृष्टकुशलोरामंगुहःप्रांजलिरब्रवीत् धन्योहमद्यमेज
न्मनैषाधंलोकपावनं बभूवपरमानंदस्पृष्ट्वातेंगंरघूत्तम नैषाधराज्यमेतत्ते किंकरस्यरघूत्तम
त्वदधीनंवसंस्तत्रपाल्यायास्मन्रघूद्वह आगच्छयामोनगरंपावनंकुरुमेगृहं गृहाणफलमूला
नि त्वदर्थसंचितानिमे अनुगृह्णीष्वभगवंदासस्तेहंरघूत्तम रामस्तमाह सुप्रीतोवचनंशृणुमेसखे
नवेक्ष्यामिगृहंग्रामंवर्षाणिनवपंचच दत्तमन्येननोभुंजेफलमूलादिकिंचन राज्यंममैतत्तेसर्वंत्वं
सखामेतिवल्लभः वटक्षीरंसमानाय्यजटामुकुटमादरात् बबंधलक्ष्मणेनाथसहितोरघुनंदनः
जलमात्रंतुसंप्राश्यसीतयासहराघवः आस्तृतंकुशपर्णाद्यैःशयनंलक्ष्मणेनहि उवासतत्रनगरे
प्रासादाग्रेयथापुरा सुष्वापतत्रवैदेह्यापर्यंकइवसंस्कृते ततोविदूरेपरिगृह्यचापंसबाणतूणीरध
रःसलक्ष्मणः रक्षन्रामंपरितोविपश्यन्गुहेनसार्द्धंसशरासनेन॥इतिश्रीमदध्यात्मरामायणे
योध्याकांडेपंचमोध्यायः॥५॥सुप्तंरामंसमालोक्यगुहःसाश्रुपरिप्लुतः लक्ष्मणंप्राहविनयाद्भ्रातः
पश्यसिराघवं शयानंकुशपत्रौघसंस्तरेसीतयासह यःशेतेस्वर्णपर्यंकेस्वास्तीर्णेभवनोत्तमे कैके
यीरामदुःखस्य कारणंविधिनाकृता मंथराबुद्धिमास्थायकैकेयीपापमाचरत् तच्छ्रुत्वालक्ष्म

त्वं नैव तत्र जीवितं दुःखितस्य मे ॥ अतऊर्ध्वं न जीवामि चिरं रामं विनाकृतः ॥ ततो महद्दुःखं प्रविश्यैव कौशल्या

याः पपात ह ॥ मूर्छितश्च चिरात् बुद्ध्वा तूष्णीमेवावतस्थिवान् ॥ रामस्तु तमसातीरे गत्वा तत्रावसत्सुखी

जनैः प्रार्थ्य निराहारो वृक्षमूले स्वपन् प्रभुः ॥ सीतया सह धर्मात्मा धनुःपाणिस्तु लक्ष्मणः ॥ पालयामास धर्म

ज्ञः सुमंत्रेण समन्वितः ॥ पौराः सर्वे समागत्य स्थितास्तस्याविदूरतः ॥ राजन्या रामं पुरं नेतुं नो चेद्गच्छाम हे

वनं ॥ इति निश्चित्य मा ज्ञायते वा रामोऽतिविस्मितः ॥ नाहं गच्छामि नगरमेते वै लोकशासनाः तिनः ॥ न विघ्नंति न संदे

२ हो सुमंत्रमित्यब्रवीत् ॥ इदानीमेव गच्छामः सुमंत्र रथमानय ॥ इत्याज्ञप्तः सुमंत्रोऽपि रथं वाहैरयोजयत् ॥

आरुह्य रामः सीता च लक्ष्मणोऽपि ययुर्द्रुतं ॥ अयोध्याभिमुखं गत्वा किंचिद्दूरं पुनर्ययुः ॥ तेऽपि राममदृष्ट्वैव रं

प्रातरुत्थाय दुःखिता ॥ रथनेमिगतं मार्गं पश्यंतस्ते पुरं ययुः ॥ हृदि रामं ससीतं ते ध्यायंतस्तस्थुरव्रहं ॥ सुमं

त्रोऽपि रथं शीघ्रं चोदयामास सादरं ॥ स्फीतान् जानपदान् पश्यन् रामः ॥ ~~ततो गुहो जनैः [illegible]~~ सीतास

मन्वितः ॥ गंगातीरं समागच्छत् शृंगवेरं विदूरतः ॥ गंगां दृष्ट्वा नमस्कृत्य स्नात्वा सानंदमानसः ॥ शिंशु

पावृक्षमूले स निषसाद रघूत्तमः ॥ ततो गुहो जनैः श्रुत्वा रामागमनमहोत्सवं ॥ सखायं स्वामिनं द्रष्टुं हृ

र्षितूर्णं समागमत् ॥ फलानि मधुपुष्पादि गृहीत्वा भक्तिसंयुतः ॥ रामस्याग्रे विनिक्षिप्य दंडवत्प्रापतद्भु

ण्यपाय सीतायै पृथक्पृथक् ॥ रामः स्ववस्त्राण्युत्सृज्य वल्कचीराणि पर्यधात् ॥ लक्ष्मणो[illegible]पि तथा चक्रे सीता
न विजानती ॥ हस्ते गृहीत्वा रामस्य लज्जया मुखमैक्षत ॥ रामो गृहीत्वा तच्चीरमंशुके पर्यवेष्टयत् ॥ तं दृ
ष्ट्वा रुरुदुः सर्वे राजदाराः समं ततः ॥ वसिष्ठस्तत्तदाकर्ण्य रुदितं नत्सयत्स्नुषां ॥ कैकेयीं प्राह दुर्वृत्ते रा
मेण वन्त्वया वृतः ॥ वनवासाय दुष्टे त्वं सीतायै किं प्रदास्यसि ॥ यदि रामेण समं चेति सीता गन्ता पतिव्रता ॥
दिव्यांबरधरा नित्यं सर्वाभरणभूषिता ॥ रामस्य त्वनिशं रामं वनदुःखनिवारिणी ॥ इत्युक्ता वररामाथव
सिष्ठो वदतां वरः ॥ राजा दशरथो प्याह सुमं[illegible] ते रथ[illegible] मानय रथमारुह्य गच्छन्तु वनं वनचरप्रिया
इत्यु[illegible]क्तो रामभ्रात्रा लोक्य सीतां चैव सलक्ष्मणां दुःखान्निपतिता[illegible]ति तो नृपो रुरोदाश्रुपरि
प्लुतः ॥ आरुरोह[illegible] रथं सीता [illegible] सघं रामस्य पश्यतः ॥ रामः प्रदक्षिणं कृत्वा पितरं रथमारुहत् ॥
लक्ष्मणः खड्गयुगलं धनुस्तूणीयुगं तथा ॥ गृहीत्वा रथमारु[illegible]ह्य चोदयामास सारथिं ॥ तिष्ठ तिष्ठ
सुमंत्रेति राजा दशरथोब्रवीत् ॥ गच्छ गच्छेति रामेण चोदितो नाद्रवद्रथं ॥ रामे दूरं गते राजा मूर्च्छित
तः ॥ प्रापतद्भुवि पौराश्च बालवृद्धाश्च वृद्धा वा स्त्रीजनस्तमाः ॥ तिष्ठ तिष्ठेति रामेति क्रो[illegible]तारथमन्वयुः
रा[illegible] तान्रुदित्वा सुचिरं मानयंश्च गृहं प्रति ॥ कौशल्या या राममातुरित्याह पर्यश्वारकान् ॥ किंचित्को

ह्रनिष्यति॥ मानुषैर्नैवमरणंतस्याद्दिष्टंदुरात्मनः॥ राजादशरथेनापितपसाराधितोहरिः॥ पुत्रत्वाकां
क्षयाविष्णोस्तस्यापुत्रोभवद्धरिः॥ सएवविष्णुःश्रीरामोरावणादिवधायहि॥ गंताह्येववनंरामोलक्ष्मणेन
सहयवान्॥ एषासीताहरेर्मायासृष्टिस्थित्यंतकारिणी॥ राजावाकैकेयीवापिनात्रकारणमण्वपि॥ पूर्वेद्युः
नारदःप्राहनूनारहरणायच॥ रामोप्याहस्वपंसाक्षाद्योगमिष्यामिदंडकंवनं॥ अहोरात्रंसमुद्दिश्यचिंतांत्यजंत्य
वान्निशाः॥ रामरामेतियेनित्यंजपंतिमनुजाभुवि॥ तेषांमृत्युभयादीनिनभवंतिकदाचन॥ किंपुनःकृस्य
रामस्यदुःखशंकामहात्मनः॥ रामनाम्नैवमुक्तिःस्यात्कलौनान्येनकेनचित्॥ मायामानुषरूपेणविडंबय
तिलोकहृत्॥ भक्तानांभजनार्थायरावणस्यवधायच॥ राजाप्यशेषसिद्ध्यर्थंमानुषंवपुराश्रितः॥ इत्यु
क्त्वाकिलरामायवामदेवोमहामुनिः॥ श्रुत्वातेपिद्विजाःसर्वेरामंज्ञात्वाहरिंविभुं॥ जहुर्हृत्संशयग्रंथिंरा
ममेवान्वचिंतयन्॥ जरदंचविनयन्नित्यंरहस्यंरामसीतयोः॥ तस्यरामेरदन्तिनिर्विघ्नज्ञानपूर्वकं॥ रह
स्यंगोपनीयंवोयूयंवैराघवप्रियाः॥ इत्युक्त्वापन्नगोविप्रास्तेपिरामंपरंविदुः॥ ततोरामःसमाविश्यपित
गेहंनिवारितः॥ सानुजःसीतयागत्वाकैकेयीमिदमब्रवीत्॥ आगतास्मवयंमातस्त्वयस्तेसंमतंव
नं॥ गंतुंकृतधियःशीघ्रमाज्ञापयतुनः॥ इत्युक्तासहसोत्थायचीराणिप्रददौस्वयं॥ रामायलक्ष्म

स एव जानकी[illegible]सुंदरी॥ सापपादेन गंछति जनसे वेष्वनादृता॥ [illegible]पादचा

तः॥ ग[illegible]सपदिपुं[illegible]केकसंमतं॥ राक्षसी कैकेयी नाम्नी[illegible]विनाशिनी॥ रामस्यापि न वैत

दुःखं वै सीतापाः पादपानतः॥ बलवान् विद्धि रेवात्र पुत्रयत्ने नि दुर्बला॥ इति दुःखाकुला[illegible]देसाधूनां

निपुंगवः॥ [illegible]दीक्षामे देवोप्यसाधूनां संघमध्यमः॥ मानुषो[illegible]सीतां काच्चितत्वतः॥ एष रामः

३ परो वि[illegible]रा[illegible]नारायणः स्मृतः॥ एषा सा जानकी लक्ष्मी योगमायेति विश्रुता॥ असौ शेष[illegible]ति ये

लक्ष्मण रूप[illegible]वसापूत॥ एष मायागुणैर्युक्तस्तदाकारवानिव॥ एष एव रजोयुक्तो ब्रह्माभूद्विश्वभावनः॥

सत्वादेस्तत्पाविष्णुस्त्रिजगत्प्रतिपालकः॥ एष रुद्रस्तमस्यते जगत्प्रलयकारणं॥ एष मत्स्यः पुरा भूत्वा

रा० [illegible]स्वतं मनुं॥ नाव्यारोप्य प्रलये स्यांते पालयामास राघवः॥ समुद्रमथने पूर्वं मंदरे सुतलं गते॥ अ

धारयत्स्वपृष्ठेऽद्रिं [illegible] कूर्मरूपी रघूत्तमः॥ महीं रसातलं याता प्रलये सूकरोऽभवत्॥ तोलयामास दं

२५ ष्ट्राग्रे तां क्षोणीं रघुनंदनः॥ नारसिंहवपुः कृत्वा प्रह्लादवरदः पुरा॥ त्रिलोककंटकं रक्षः पाटयामास तं २०८

नखैः॥ पुत्रराज्यं हृतं दृष्ट्वा दैत्यैरदित्या याचितः पुरा॥ वामनत्वमुपागम्य प्रयाच[illegible]याचा[illegible]रस्पुनः॥ [illegible]क्षत्रि

यन्यूनारनिवृत्तये भार्गवोऽभवत्॥ स एव जगतां नाथ इदानीं रामतां गतः॥ रावण[illegible]नि दशसिकारिशो

रामोधनंसर्वंदत्वागछामहेवनं॥ लक्ष्मणत्वंद्विजश्रेष्ठेभ्योज्ञानाढ्येभ्योनतितः॥ दातव्यंधनंनस्मान्निस्ततोग
छामहेवनं॥ इत्युक्तोलक्ष्मणोनाशुद्विजानाढ्यान्नतितः॥ ददौगवांशदशतंधनानिवस्त्राणिदिव्यानिविभूषणा
नि॥ कुटुंबवत्वःक्रतश्रीलवद्भोमुद्राद्विजेभ्योरघुवंशकेतुः॥ अन्यत्यैददौसीतामुख्यान्याभरणानिच॥ रामोमा
तुःसेवकेभ्योददौधनमनेकधा॥ सकोतःपुरवासिभ्यःसेवकेभ्यस्तथैवच॥ पौरजानपदेभ्यश्चब्राह्मणेभ्यःस
मंततः॥ लक्ष्मणोऽपिसुमित्रांतुकौशल्यायैसमर्पयत॥ धनुष्पाणिःसमागम्यरामस्याग्रेव्यवस्थितः॥ रामः
सीतालक्ष्मणश्चजग्मुःसर्वेनृपालयं॥ श्रीरामःसहसीतयानृपथेगछन्शनैःसानुजः॥ पौरान्जानपदान्कु
तूहलन्दशःसानंदमुदीक्षयन्॥ रूपानःकामसदृशस्वसुंदरवपुःकान्त्यादिशोभासयन्॥ पादन्यासपवित्रितारवि
लजगत्पापालयंसतत्पितुः॥ इतिश्रीमदध्यात्मरामायणेऽयोध्याकांडेचतुर्थोध्यायः॥४॥ आयांतंनागराद्
द्रष्टामार्गेरामंतुजानकी॥ लक्ष्मणेनसमंवीक्ष्यऊचुःसर्वेपरस्परं॥ कैकेय्यावरदानादिश्रुत्वादुःखसमावृताः
॥ वतराजादशरथःसत्यसंधःप्रियंसुतं॥ स्त्रीहेतोरत्यजत्कामीतस्यसत्यवताकुतः॥ कैकेयीवाकथंदुष्टारा
मंसत्यप्रियंकरं॥ विवासयामासकथंक्रूरकर्मातिमूढधीः॥ हेजनानात्रवस्तव्यंगच्छामोद्यैवकाननं॥ यत्ररा
मःसनाथश्चसानुजोगंतुमिछति॥ पश्यंतुजानकीसैवपादचारेण[illegible]छंती॥ पुष्पितः[illegible]चित

संपुतैः ॥ अभिषेकं मुतं चक्रे राक्षसेंद्रस्य धीमतः ॥ ततः पौरजनैः सार्द्धं नानोपायनपाणिभिः ॥
विभीषणस्य सौमित्रिरुपायनपुरस्कृतः ॥ दंडप्रणाममकरोद्रामस्याक्लिष्टकर्मणः ॥ रामो वि
भीषणं दृष्ट्वा प्राप्तराज्यं मुदान्वितः ॥ कृतकृत्यमिवात्मानममन्यत सहानुजः ॥ सुग्रीवं च समालि
ग्य रामो वाक्यमथाब्रवीत् ॥ सहायेन त्वया वीर जितो मे रावणो महान् ॥ विभीषणोपि लंकाया
मभिषिक्तो मयानघ ॥ ततः प्राह हनूमंतं पार्श्वस्थं विनयान्वितं ॥ विभीषणस्यानुमतो गच्छ त्वं राव
णालयं ॥ जानक्यै सर्वमाख्याहि रावणस्य वधादिकं ॥ जानक्याः प्रतिवा[illegible]मेव निवेद
११८ य त्वं ॥ एवमाज्ञापितो धीमान् रामेण पवनात्मजः ॥ प्रविवेश पुरीं लं[illegible]निशाचरैः ॥
प्रविश्य रावणगृहं शिंशपामूलमाश्रितां ॥ ददर्श जानकीं तत्र कृशां दीन[illegible]निंदितां ॥ राक्षसीभि ११८
परिवृतां ध्यायंतीं राममेव हि ॥ विनयावनतो भूत्वा प्रणम्य पवनात्मजः ॥ कृतांजलिपुटो भूत्वा
राह्येनतयाग्रतः स्थितः ॥ तं दृष्ट्वा जानकी तूष्णीं स्थित्वा पूर्वस्मृतिं ययौ ॥ ज्ञात्वा तं रामदूतं सा हर्षा
त्सौम्यमुखाभवत् ॥ स्थितां सौम्यमुखं वीक्ष्य तामाह पवनंदनः ॥ रामस्य जीवितं सर्वं ज्ञास्यानुपूर्व
च क्रमे ॥ देवि रामस्य सुग्रीवो विभीषणः सहायवान् ॥ कुशली वानराणां च सैन्यस्य सहलक्ष्म
णः ॥ रावणं ससुतं हत्वा सबलं सह मंत्रिभिः ॥ त्वामाह कुशलं भ्राता रामो राघे

रणं तानि वैराणि निरं तं [illegible] येजं नं ॥ [illegible] स्कारो रामो पोषयथा तद्दा [illegible]
त्वाश्री घ्रमेव विभीषणः ॥ रा [illegible] मं नादं रीतथा ॥ श्रीत्वया मासा [illegible] त्मा [illegible]
[illegible]र्वि भीषण ॥ त्वरयामास [illegible] बंध [illegible] न ॥ चिंतानि वेश्म विधि [illegible]
न तः ॥ आदिता [illegible] यथा कार्यैरा वणस्य दे [illegible] ॥ तथैव सर्वमन [illegible] रो [illegible] धुभिः सहमंत्र [illegible] ॥
[illegible] ददौ वपावकं तस्य विधियुक्तं [illegible] स्नात्वा चैवा [illegible] णैः तिलान् दर्भासि मिश्रितान् [illegible]
दकेन च संमिश्रान् प्रादाय विधिपूर्वकं ॥ प्रदाय चोदके [illegible] तस्मै मूर्द्धा चैनं [illegible] णम्य च ॥ ताः स्त्रियो नु
नया मास सा त्वयनु [illegible] पुनः पुनः ॥ [illegible] मिति ताः सर्वा विविशुर्नगरं तदा ॥ प्रविष्टासु च सर्वा
राक्षसीषु विभीषणः ॥ रामपार्श्वमुपागत्य तदा तिष्ठद्विनीतवत् ॥ रामोपि सह सैन्येन ससुग्रीवः
सलक्ष्मण ॥ हर्षितो [illegible] पुरं [illegible] यथा वृत्रं जित्वा शतक्रतुः ॥ [illegible] तदा रामं [illegible] च ॥
ह्यनुज्ञातस्तु रामेण ययौ स्वर्गं विहायसा ॥ ततो हृष्टमनाः रामो लक्ष्मणं चेदमब्रवीत् ॥ विभीषण
यमेलं काराज्यं दत्तं पुरैव हि ॥ इदानीमेव गत्वा त्वं लंकामध्ये विभीषणं ॥ अभिषेचय [illegible]
त्र वद्विधिपूर्वकं ॥ इत्युक्तो लक्ष्मणस्तूर्णं जगाम सह वानरैः ॥ लंकां सुवर्णकलशैः समुद्रजल

श्मेतदुपस्थितं तं ॥ मयत्रात्वया हतो वीरो लक्ष्मणः पतितो भुवि ॥ तं जीवयितुमानेतुमौषधिं हनुमान्गतः ॥ यथा तस्य न वेद्विं
घ्नस्तथा कुरु महामते ॥ मायया मुनिवेषेण मोहय स्व महाकपिं ॥ कृत्वा स्थैर्यो यथा भूयात्तथा कुरु त्वं हि मंदिरं ॥ रावणस्य
वचः श्रुत्वा कालनेमिरुवाच तं ॥ [illegible] मघमृगु धारयत त्वतः ॥ प्रियं ते करवाण्येव न प्राणान्धारयाम्य
हं ॥ मारीचस्य यथारण्ये पुरा [illegible] णः ॥ तथैव मे न संदेहो [illegible] ज्ञानन ॥ हतां पुत्रांश्च पौत्रांश्च बांधवाराक्ष
सांश्च ते ॥ घातयित्वा सुरकुलं [illegible] पिवितवा ॥ राज्येन वा सीतया वा किं देहेन जडात्मना ॥ सीतां प्रयच्छ रामाय राज्यं दे
हि विभीषणे ॥ वनं याहि महाबाहो [illegible] मुनिगणाश्रयं ॥ स्नात्वा प्रातः शुभजले कृत्वा संध्यादिकाः क्रियाः ॥ ततएकांतमा
स्थित्य सुखासनपरिग्रहः ॥ वि[illegible] संगविरान्विषयान्निरुद्ध बहिः [illegible] नाहगणं शनैः प्रत्यक्त्वप्रवाहय ॥ प्रकृतेर्भि
न्नमात्मानं विचारय सदानघ ॥ चरा[illegible] जगत्कृत्स्नं देहबुद्धींद्रियादिकं ॥ आब्रह्मस्तंबपर्यंतं दृश्यते श्रूयते च यत् ॥ सैषा प्रकृति
रित्युक्ता सैव मायेति कीर्तिता ॥ सर्गस्थितिविनाशाय जगद्वृक्षस्य कारणं ॥ लोहितश्वेतकृष्णादिप्रजाः सृजति सर्वदा ॥ काम
क्रोधादिपुत्राद्यान् हिंसातृष्णादिकन्यकाः ॥ मोहयत्यनिशं देवमात्मानं स्वगुणैर्विभुं ॥ कर्तृत्वभोक्तृत्वमुखान्स्वगुणा
नात्मनीश्वरे ॥ आरोप्य स्ववशं कृत्वा तेन क्रीडति सर्वदा ॥ शुद्धोऽप्यात्मा यया युक्तो पश्यत्येव सदा स्फुटं ॥ जीवन्मुक्तोऽस्त
दोषैर्हीमुच्यते [illegible] कृतैर्गुणैः ॥ त्वमप्येवं सदात्मानं विचार्य निपतेंद्रियः ॥ प्रकृतेरन्यमात्मानं [illegible] तत्वा मुक्तो
भविष्यसि ॥ ध्यात्वा तु [illegible] समर्थोसि सगुणं देवमाश्रय ॥ हृत्पद्मकर्णिके स्वर्णपीठे मणिगणान्विते ॥ मृदुश्लक्ष्णतरे द

(5)

त॥ हतस्यापि शरैस्तीक्ष्णैर्वायुसूनोः स्वतेजसा॥ व्यवर्द्धत पुनस्तेजेन नर्द च महाकपिः॥ ततो दृष्ट्वा हनूमंतं सव्र
णं रघुसत्तमः॥ क्रोधमाहारयामास कालरुद्र इवापरः॥ साश्वं रथं ध्वजं सूतं शस्त्रौघं धनुरोजसा॥ छत्रं पताकं
तरसा विच्छेद शितसायकैः॥ ततो महाशरेणासु रावणस्य रघूत्तमः॥ विव्याध वज्रकल्पेन पाकारिरिव पर्वतं॥
रामबाणहतो वीरस्स्वचाल च मुमोच ह॥ हस्तान्निपतितश्चापस्तं समीक्ष्य रघूत्तमः॥ अर्द्धचंद्रेण चिच्छेद तत्किरी
टरविप्रभं॥ अनुज्ञानामि गछत्वमिदानीं बाणपीड़ितः॥ प्रविश्य लंकामाश्वस्य श्वः पश्यसि बलं मम॥ रामबाणेन
संविद्धो हतदर्पोथ रावणः॥ निहतस्याल्लज्जया युक्तो लंकां प्राविशदातुरः॥ रामोपि लक्ष्मणं दृष्ट्वा मूर्छितं पतितं
भुवि॥ मानुषत्वमुपाश्रित्य लीलया नुशुशोच च॥ ततः प्राह हनूमंतं वत्स जीवय लक्ष्मणं॥ महौषधीयं समानी
य पूर्ववद्वानरानपि॥ तथेति राघवेणोक्तो जगाम स महाकपिः॥ हनूमान्वायुवेगेन क्षणं तीर्त्वा महोदधिं॥ एत
स्मिन्नंतरे चापरावणाय न्यवेदयत्॥ रामेण प्रेषितो देव हनूमान्क्षीरसागरं॥ गतो नेतुं लक्ष्मणस्य जीवनार्थं महौ
षधीः॥ श्रुत्वा तत्वार वचनं राजा चिंतापरोभवत्॥ जगाम रात्रावेकाकी कालनेमिगृहं क्षणात्॥ गृहागतं समा
लोक्य रावणं विस्मयान्वितः॥ कालनेमरुवाचेदं प्रांजलिर्नयविह्वलः॥ अपीदिकं ततः श्रुत्वा रावणस्याननतः स्थि
तः॥ किं ते करोमि राजेंद्र किमागमनकारणं॥ कालनेमिमुवाचेदं रावणो दुःखपीड़ितः॥ ममापि कालवशातः क